# न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम्

# Nyāyasiddhāntamuktāvalyāḥ Pratyakṣakhaṇḍe Dinakarī-Prabhā-Mañjūṣāṇāṃ Samīkṣātmakamadhyayanam

**यादवपुरविश्वविद्यालयस्थे संस्कृतसंकाये सप्तदशाधिकद्विसहस्रतमाङ्गलवर्षारम्भक-ऊनविंशत्यधिकद्विसहस्रतमाङ्गलवर्षावधिके शिक्षावर्षे एम्.फिल्. इत्युपाध्यधिगमनिमित्तकगवेषणबन्धः**


**शोधबन्धकारक**

## सुव्रत-गायेनः

Roll No. – 001701203003

Examination Roll No. MPSA194003

Year – 2017 - 2019

Registration No. – 142334 of 2017 -18

**निर्देशकाः**

## अध्यापकाः तपनशङ्कर-भट्टाचार्याः

संस्कत-विभागीयाः

# न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम्

**यादवपुरविश्वविद्यालयस्थे संस्कृतसंकाये सप्तदशाधिकद्विसहस्रतमाङ्गलवर्षारम्भक-**
**ऊनविंशत्यधिकद्विसहस्रतमाङ्गलवर्षावधिके शिक्षावर्षे**
**एम्.फिल्. इत्युपाध्यधिगमनिमित्तकगवेषणबन्धः**


**गवेषणबन्धकारकः**

**सुव्रतगायेनः-**

यादवपुरविश्वविद्यालयस्थसुरवाग्विभागीयः
क्रमिकसंख्या – 001701203003
परीक्षाक्रमिकसंख्या –MPSA194003
शिक्षासत्रम् – 2017-2019
निबन्धीकरणसंख्या 142334 –of 2017-18

**मार्गदर्शकाः**

**अध्यापकाः तपनशङ्कर-भट्टाचार्य्याः**

यादवपुरविश्वविद्यालयस्थसुरवाग्विभागीयाः

**संस्कृतविभागः**
**यादवपुरविश्वविद्यालयः**
**यादवपुरम्,कलिकाता - ७०००३२**


**शिक्षावर्षम् – २०१७-२०१९**

A Dissertation entitled

# Nyāyasiddhāntamuktāvalyāḥ Pratyakṣakhaṇḍe Dinakarī-Prabhā-Mañjūṣāṇāṃ Samīkṣātmakamadhyayanaṃ

Submitted to the Department of Sanskrit, Jadavpur University,

Jadavpur, Kolkata,

For the Partial Fulfilment of the Requirements for the Degree of M. Phil.


Submitted by:

**Subrata Gayen**

Roll No – 001701203003

Examination Roll No - MPSA194003

Year – 2017-2019

Registration No: 142334 of 2017-18

Supervisor

**Professor Dr. Tapan Sankar Bhattacharya**

Dept. Of Sanskrit

Jadavpur University

DEPARTMENT OF SANSKRIT

JADAVPUR UNIVERSITY

JADAVPUR, KOLKATA – 700 032

CERTIFIED That THE THESIS Entitled **'न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्'** submitted by me, Examination Roll. No. MPSA194003, Registration No. 142334 of 2017-18 for the award of the degree of Master of Philosophy in Sanskrit at the Jadavpur University is based upon my own work carried out under the Supervision **Professor Dr. Tapan Sankar Bhattacharyya** and that neither this dissertation nor any part of it has been submitted before for any diploma anywhere/ elsewhere. And I have properly acknowledged the source of materials used in my dissertation,

…………………………. ……………………….

Countersigned by
The Supervisor
Prof. Tapan Sankar Bhattacharyya
Date:

Candidate:
Date:

## TO WHOM IT MAY CONCERN

This is to certify that **Subrata Gayen** has prepared this dissertation entitled **'न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्'**, I consider it fit for submission for the degree of Master of Philosophy (Arts) in the Department of Sanskrit of Jadavpur University.

The Head of the Department of Sanskrit
Jadavpur University
Kolkata – 700 032

# DECLARATION BY THE SUPERVISOR

This is to certify that the project work dissertation entitled **'न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्'** Submitted in partial fulfilment of the Degree of **Master of Philosophy** (Arts) in Sanskrit, Jadavpur University bona-fide record of the project work carried out by **Subrata Gayen** (Examination Roll. No. MPSA1940003, Registration No. 142334 of 2017-18) under my guidance and supervision and I certify that this work is original and has not been submitted elsewhere for any degree.

………………………………..
Countersigned by the Supervisor
Prof. Tapan Sankar Bhattacharyya
Jadavpur University
Date:

# कार्तज्ञ्यज्ञापनम्

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम्।

पृथुमित्थमथाणुरस्तु वा न विशेषे विदुषामिह ग्रहः।। इति श्रीहर्षभणितिं स्मारं स्मारं कृतज्ञो ननु दुर्लभ इति च विद्वदुपज्ञं वचनं ध्यायं ध्यायं कार्तज्ञ्यज्ञापनमत्यावश्यकं कर्मेति तद्विज्ञापने प्रवृत्तिर्मे। तथाहि ये हि सन्तोऽपि त्यक्तसर्वैषणाः शिष्यवत्सला जगदनुजिघृक्षया बाल्यात्प्रभृत्यशनवसनादिप्रदानपूर्वकं संस्कृतशास्त्राण्यध्यापितवन्तस्तेभ्यः अध्यापितानेकशिष्येभ्यः अध्यापनकुशलैः शिष्यैः समुद्भासितयशस्केभ्यस्तपोमूर्तिभ्यः सदैश्वरनिष्ठेभ्यः करुणावरुणालयेभ्य आनन्दघनमूर्तिभ्यस्तत्तत्त्वविद्भ्यः स्वामितत्त्वविदानन्दपादेभ्यस्तच्चरणकमलचञ्चरीकोऽहं तत्प्रत्युप-क्रियामन्यथा विधातुमक्षमः सश्रद्धं साष्टाङ्गं प्रणतिततिं समर्प्य भूयो भूयः कार्तज्ञ्यं विज्ञापयामि।

अथ च, येषां ज्ञानेन निर्देशनेन प्रवचनेनाध्यापनेन विषयस्थापनकौशलेन विषयनिर्वचनेनैतादृशनव्यन्यायनिगूढतत्त्वग्रथितग्रन्थग्रन्थिविमोचने तथा तत्तन्मतसमीक्षणरूपगवेषणकार्ये साफल्यमवापं तेषां व्याकरणपारावारपारङ्गातानां न्यायनदीष्णानां मीमांसादिदर्शनशास्त्रनिपुणानां काव्यकलाकोषादिनिगमपारावारपारङ्गतानां सदा सरलहृदयानामार्याणां यादवपुरविश्वविद्यालयस्य अध्यापकवर्याणां ड.तपनशङ्करभट्टाचार्यमहाभागानां चरणारविन्दयोर्मुहुर्मुहुः प्रणतिततिं निवेद्य कार्तज्ञ्यं ज्ञापयामि।

तथा च, यादवपुरविश्वविद्यालयस्य अन्येभ्यः अपि आचार्येभ्यस्तथाचार्याभ्यश्च स्वकार्तज्ञ्यं विज्ञापयामि।

तदनु शब्दशास्त्राम्बुधिपारदृश्वानां साहित्यसुधासुहितमानसानां तर्कादिशास्त्रसार्वभौमानां पश्चिमवङ्गराज्यविश्वविद्यालयस्य अध्यापकवर्याणाम् अयनभट्टाचार्याणां तथा मदाचार्याणां व्याकरण-साहित्यन्यायदर्शनवेदान्ताद्यनेकविद्यामर्मज्ञानां व्याख्यानपाटवपटहबधिरीकृतवादिवृन्दानां शेखसाबिर-आलिमहोदयानां तथान्येषां व्याकरणन्यायादिशास्त्रेष्वकुण्ठितमतीनाम् आचार्याणां ड. सत्यव्रतपाहाडि-दुर्गाशङ्करचक्रवर्त्यादिमहाभागानां चरणयोः प्रणतिततीर्विनिवेदयामि।

'सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।'

- इति भणितिं स्मारं स्मारं मम जननीं मातरं शोभादेवीं जनकं पञ्चाननञ्च सश्रद्धं प्रणमामि। प्रभूतोत्साहप्रदानाय च प्रेमास्पदं मदीयसहोदरा सुदीप्ता सप्रेम स्मर्यते। अपि च विविधग्रन्थादिप्रदानेन,

मानसशक्तिप्रदानेन चोदयित्र्यै, विशेषतः प्रीतिस्नेहप्रदानेन यथासाध्यं विविधप्रकारेण साहाय्यमाचरितवत्यै हृदयसमायै प्रियायै रियायै बन्धुसुलभं प्रेमस्नेहादिकं विज्ञाप्यते।

एतदनुसन्धानात्मककार्यं सम्पादयितुमग्रजोपमाचार्यस्य सन्तु-सिंहस्य वॉकुडा-विश्वविद्यालयप्राध्यापकस्य साक्षात् परोक्षं वा सहायं विना अद्यावधि अध्ययनकर्मसम्पादने असमर्थोऽहं, स्वप्रयोजनमगणयन्नपि मत्प्रयोजनीयवस्तुसंग्रहपराय, मम संस्कृतजगति प्रतिष्ठाप्राप्तये स्वसामर्थ्यानुगुणं विविधप्रकारसहायप्रदात्रे कार्तज्ञ्यप्रसूनं विनिवेद्यते। सारस्वतसुधानुसन्धानरतानां श्रीजीव-मलय-दीपक-सुजित-हाराधन-विपत्तारण-जगदीशाग्रजानां ममतासुमनादेवाशीषानां प्रत्यक्षतः परोक्षतः यत्साहाय्यं मया प्राप्तं तत्सर्वं स्मारं स्मारं सम्प्रत्यनुसन्धानतपःपूर्तिवेलायां तेभ्यः भूयो भूयः कायेन मनसा वाचा धिया च हार्दिकान् धन्यवादान् विनिवेदयामि।

किञ्च, शोधकर्मणि सहायकभूता ग्रन्थाः रामकृष्णमिशन्-विद्यामन्दिरस्य यादवपुर-विश्वविद्यालयस्य बांकुडाविश्वविद्यालयस्य संस्कृतसाहित्यपरिषदश्च ग्रन्थालये मया लब्धाः, अतः तत्तद्ग्रन्थालयं प्रति तथा तत्तद्ग्रन्थकारिकान् प्रति च मदीयं कार्तज्ञ्यं व्याहरामि। अन्ततश्च,

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि।

यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि।।

इति विनिवेद्य सारदारामकृष्णयतिराजपादारविन्देषु मद्गवेषणप्रसूनाञ्जलिं विनिवेद्य प्रार्थये

भ्रान्तेर्मानुषधर्मत्वादल्पज्ञत्वाच्च मादृशाम्।

दयालवः सदा सन्तः कुर्वन्त्वत्र दयालवम्।। इति शम्।

# शब्दसंकेतः

अष्टा. – अष्टाध्यायी

का.व. – कारिकावली

कि.व. – किरणावली

त.भा. - तर्कभाषा

त.सं. – तर्कसंग्रहः

त.सं.दी. – तर्कसङ्ग्रहदीपिका

दिन. – दिनकरी

न्या.कु. – न्यायकुसुमाञ्जलिः

न्या.सि.मु. – न्यायसिद्धान्तमुक्तावली

न्या.सू.वृ. – न्यायसूत्रवृत्तिः

प्र.पा.भा. – प्रशस्तपादभाष्यम्

ब.न.च. – बङ्गे नव्यन्याय चर्चा

भा.प. – भाषापरिच्छेदः

वै.सू. – वैशेषिकसूत्रम्

व्यु.वा. – व्युत्पत्तिवादः

श.श.प्र. - शब्दशक्तिप्रकाशिका

# सूचीपत्रम्


| विषयः | पृष्ठाङ्कः |
|---|---|
| • **उपोद्घातः** | **1** |
| • **प्रथमोऽध्यायः – मुक्तावलीमुक्तावलीकृत्परिचितिः** | **10-28** |
| १.१) विश्वनाथसिद्धान्तपञ्चाननपरिचयः | 10 |
| १.२) विश्वनाथकृतिकृतिततिपरिचितिः | 14 |
| १.३) न्यायशास्त्रे सिद्धान्तमुक्तावल्याः स्थानं महत्त्वञ्च | 21 |
| १.४) सिद्धान्तमुक्तावल्यां प्राचामाचार्याणां ग्रन्थान्तराणाञ्च प्रभावः | 26 |
| १.५) न्यायसिद्धान्तमुक्तावल्या रचनाशैली | 26 |
| १.६) न्यायसिद्धान्तमुक्तावल्याः टीकाः | 27 |
| • **द्वितीयोऽध्यायः - दिनकरीदिनकरीकारपरिचयः** | **29-38** |
| २.१) मुक्तावलीव्याख्यासु दिनकर्य्याः स्थानं वैशिष्ट्यं च | 29 |
| २.२) दिनकर्याः परिच्छेदविन्यासः | 31 |
| २.३) दिनकरीकारप्रत्यभिज्ञा | 32 |
| • **तृतीयोऽध्यायः – प्रभामञ्जूषाकृत्परिचितिः** | **39-47** |
| ३.१) प्रभाकारपरिचयः | 39 |
| ३.२) श्रीपट्टाभिरामशास्त्रिपरिचयः | 42 |

- **चतुर्थोऽध्यायः – न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम्** **48-98**

४.१) न्यायसिद्धान्तमुक्तावल्याः मङ्गलवादे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 48

४.२) न्यायसिद्धान्तमुक्तावल्याः ईश्वरवादे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 57

४.३) न्यायसिद्धान्तमुक्तावल्याः पदार्थोद्देशवादे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 62

४.४) न्यायसिद्धान्तमुक्तावल्याः सादृश्यातिरिक्त्वपदार्थत्वानुमानवादे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 65

४.५) न्यायसिद्धान्तमुक्तावल्याः विशेषवादे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 67

४.६) न्यायसिद्धान्तमुक्तावल्याः पृथिवीप्रकरणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 71

४.७) न्यायसिद्धान्तमुक्तावल्याः अब्निरूपणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 73

४.८) न्यायसिद्धान्तमुक्तावल्याः तेजःप्रकरणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 77

४.९) न्यायसिद्धान्तमुक्तावल्याः वायुग्रन्थे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 80

४.१०) न्यायसिद्धान्तमुक्तावल्याः आकाशग्रन्थे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 84

४.११) न्यायसिद्धान्तमुक्तावल्याः कालप्रकरणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 90

४.१२) न्यायसिद्धान्तमुक्तावल्याः आत्मप्रकरणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 92

४.१३) न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षप्रकरणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् 96

- **उपसंहारः** **99**
- **सहायकग्रन्थग्रामाः परिशीलितप्रबन्धाश्च** **107**

# न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम्

## • उपोद्घातः

**'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तवो निदिध्यासितव्य'** इति भागवती श्रुतिर्भवबन्धननाशनसाधनत्वेन श्रवणमनननिदिध्यासनानि उपदिशति। तेषु मननसाधनप्रतिपादको हि न्याय इति **'न्यायचर्चेयमीशस्य मननव्यपदेशभाक्'।**[१] इति। अतो हि भगवताक्षचरणेन महर्षिणा सर्वजन्तूनामात्यान्तिकदुःखोन्मूलनार्थं **'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजन्पवितण्डा-हेत्वाभासछलजातिनिग्रहस्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'**[२] इति प्रथम-सूत्रेण निःश्रेयससाधनतया प्रतिपादितं षोडशपदार्थतत्त्वज्ञानं तदनुवर्तिभिः सर्वैरेव विद्वद्वरैः तत्तद्ग्रन्थेषु अनुमोदितम्। अथ प्रमाणप्रमेयादिपदार्थत्वेन प्रपञ्चिते अपि प्रताप्यमाने कर्कशतरतर्कप्रपञ्चे श्रीमद्गङ्गेशोपाध्यायैः षोडशपदार्थाननादृत्य **'मानाधीना मेयसिद्धि'**रिति नयेन प्रमेयप्रतिपिपादयिषामात्रस्यैव प्रमाणायत्तसिद्धिकतया तथा उपजीव्यतया प्रमाणबुभुत्साया एवौत्सर्गिकतया प्रमाणमार्गमात्रमाश्रित्य तत्त्वचिन्तामणिग्रन्थो निखिलशास्त्रकृदादरणीयतमः निरतिशयवाङ्माधुरीगुम्फितो निसर्गसुन्दरातिसंक्षिप्तपदसङ्घटनैर्विनिर्मितोऽपि बह्वर्थ-गर्भितः अदभ्र-पराक्रान्त्या विप्रतिपन्नोपपत्तिनिराकृतिविजृम्भणेन व्यरचि यस्य नव्यन्याय इति लोकोत्तरमर्यादा। असंख्याताः खलु किरणायमाणास्तस्य

---

[१] न्या. कु., सम्पा. श्यामापदमिश्र, पृ- 4

[२] न्या. सू. 1.1.1

व्याख्यानोपव्याख्यानसन्दर्भाश्चिन्तामणित्वं मणिग्रन्थस्यान्वर्थ्यं विदधन् स्वभासा भासन्तेतराम्। तेषु च, विश्वविश्रुतवैदुष्यवैदुर्यशोभितस्य काणभट्टेति प्रथितस्य तत्रभवतस्तार्किकशिरोमणेः श्रीरघुनाथशिरोमणेः कीर्त्तिर्दीधितिः जागदीशगादाधर-व्याख्यानद्वितयसनाथिता नव्यन्यायमन्दाकिन्याः परमां स्फूर्त्तिं सम्पादयन्ती सर्व्वैरेव सबहुमानमुपजीव्यते। किन्तु क्रमेण मणिदीधित्योः बालानां पठनं दुष्करमिति तदीयाशयनिचयमनुसृत्य काणादन्यायमतयोस्सङ्क्षेपरूपो भाषापरिच्छेदापरनामक-कारिकावल्याख्यग्रन्थो ग्रथितः श्रीविश्वनाथसिद्धान्तपञ्चाननैः। भवत्सु प्रकरणग्रन्थान्तरेषु तर्कभाषा-तर्कसंग्रह-तर्ककौमुदी-तार्किकरक्षादिषु कारिकावली-कीर्त्तिगरिमा ग्रन्थान्तरोपयोगितामतिशेते। तद्भाषापरिच्छेदनिगूढतत्त्वप्रकाशार्थं नैकैर्विद्वद्भिर्नैकाः टीकाः प्रणीताः। तासु महादेवदिनकरभट्टयोः दिनकरीयं, रायनृसिंहशास्त्रिणः प्रभा, तच्छिष्यस्य श्रीपट्टाभिरामस्य मञ्जूषा च सर्वा हि टीका अतिशय्य विद्योतन्तेतमाम्।

प्रकाशापरनामधेयो दिनकरीयः ग्रन्थो ग्रन्थग्रन्थिजालजटिलोऽपि अनायासतयाकरग्रन्थनिगूढार्थनिरूपणेन न्यायनयनिपुणमनआवर्जनकर इति निर्विवादविषयो विदुषाम्। प्रभा मञ्जूषा चानितरसाधारण्यौ ग्रन्थान्तरापेक्षया विचारगाम्भीर्यमुद्वहन्त्यौ ग्रन्थकारतात्पर्यपरिप्रकाशके तथा तादृशेतरदुरूहग्रन्थ-ग्रन्थिमोचनेन स्वप्रतिभया बन्धेतरमतमर्दनेन च नर्त्तयन्ति शास्त्रानुशीलन-परिशीलितधीषणानां सतां चेतांसि। तथाहि युक्तमुक्तं श्रीशङ्कररामशास्त्रिणा –

**विविच्य मूलभाववर्णनेन प्रतिपदमवतारिकादानेन अतिललित-पदसन्दर्भणेन व्याख्या-भेदप्रकारप्रदर्शनेन विविधोदाहरणैस्स्वोक्तिप्रामाण्य-व्यवस्थापनेन मुक्तावलीवाक्यार्थवर्णनेन च व्याख्यानान्तराणि श्रीनृसिंह-शास्त्रिविरचिता प्रभानाम्नी व्याख्या नितरामतिशेत इति व्याख्यातारतम्य-परीक्षाकुतूहलिनां मानसमेव मानम्। मञ्जूषानाम्नी मुक्तावलीटीका पट्टाभिरामशास्त्रिरचितातिविस्तृता दुरूहपरिष्कारघटिता नवीनशाब्दबोध-परिष्काररीत्या दिनकरीयखण्डनेन क्रोडपत्रवत् विद्वत्सभासु वादवेलायां पाण्डित्यप्रकटनायोपयुज्यते**[३] इति।

ननु संशयप्रयोजनान्यतरविरहे सुकृतिनां कृतिततिषु सिद्धे अपि सकलसिद्धान्ते नेदं विचारविषयतामवगाहते। तथाहि – **'नानुपलब्धे न निर्णीते न्यायः प्रवर्तते, किं तर्हि संशयिते'** इति। एवं तत्र तत्र विस्तृते अपि विविधविबुधव्याख्याने यद्यपि एकमेव समानं विषयमाश्रित्य व्याख्यातारः तत्तद्ग्रन्थेषु तत्तत्सिद्धान्तानुगुणं मूलग्रन्थव्याख्यानपराः तथापि व्याख्यातृबुद्धिवैभन्न्यान्मिथो वैमत्यं सुलभम्। तेषां परस्परसमीक्षणेन विना तादृशव्याख्यातृकर्कशतरगीर्वारिपिच्छिले अध्वनि न प्रवर्तते मतिमतां सतां मतिरिति तयोरत्र समीक्षणमाद्यं प्रयोजनम्। किञ्च तेषां समीक्षणेनैव मूलकृतामाशयः अपि स्फुटतरः स्यादिति अत्र केषु विषयेषु साम्यं वैषम्यञ्च विभृतः, कुत्र वा नवमतमुपन्यस्तं, कुत्र च परस्परसिद्धान्तच्छेदनं, टीकाकृतां सिद्धान्तानां कतरद्गरीयः कतरदवरो वा तदिह संक्षेपतो यथामति अस्मद्ग्रन्थे निबद्धम्।

---

**[३]. का. व., सम्पा. शङ्कररामशास्त्री, पृ – 5**

मद्गवेषणबन्धे विश्वनाथविरचितन्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डस्थान् विषयान् आश्रित्यैव दिनकरी-प्रभा-मञ्जूषाणां मतसमीक्षणं विहितम्। अतो मे गवेषणनामधेयं **न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरीप्रभा-मञ्जूषाणां समीक्षणात्मकमध्ययनम्** इति। दिनकरी च प्रभा च मञ्जूषा चेति विग्रहे इतरेतरद्वन्द्वे दिनकरीप्रभामञ्जूषाः, तेषामिति दिनकरीप्रभामञ्जूषाणामिति पदनिष्पत्तिः। ननु दिनकरी च प्रभा च मञ्जूषा चेतीतरेतरद्वन्द्वे **अल्पाच्तरम्**[४] **(2.2.34)** इति परनिपातनियमात् स्वल्पाज्विशिष्टस्य प्रभापदस्य ततश्च मञ्जूषापदस्यैव पूर्वप्रयोग उचित इति कथं तद्वैपरीत्यम् इति जिज्ञासायामुच्यते अत्र टीकानां विरचनक्रमानुसारमुल्लेख इष्टः। किञ्च, प्रभामञ्जूषे यद्यपि मुक्तावल्या व्याख्यानार्थं प्रवृत्ते तथापि प्रायश एव दिनकरीव्याख्याखण्डने तथा स्वसिद्धान्तोपस्थापने एव तयोस्तात्पर्यमिति प्रभामञ्जूषयोर्यथा न्यायसिद्धान्त-मुक्तावली आधारभूता तथा दिनकर्यपि पूर्वपक्षत्वेनाधारभूतेति ताभ्यां प्राग् दिनकर्या उल्लेखः। प्रभमञ्जूषयोर्मध्ये अपि पट्टाभिरामगुरुरचितत्वेन प्रभायाः प्राग्भावित्वान्मञ्जूषाया पूर्वं तदुल्लेख इति बोध्यम्। ननु तथा सत्यपि अत्र **अल्पाच्तरम् (2.2.34)** इति शब्दानुशासननियमभङ्गप्रसङ्गो दुर्वार इति चेन्न द्वन्द्वे परनिपातशास्त्रस्यानित्यत्वात्। तथाहि अल्पाच्तरम् इति भगवता पाणिनिना एव कृतो नियमो नाङ्गीकृतः **लक्षणहेत्वोः क्रियाया**[५] (3.2.126) इति तदीये शास्त्रे। तथाहि लक्षणं च हेतुश्च इति विग्रहे इतरेतरसमासे अल्पाच्तरम् इति नियमात् अल्पाज्विशिष्टस्य हेतुपदस्यैव पूर्वप्रयोग उचितः। परं पाणिनिना न कृतमिति तेनैव

४. अष्टा., सम्पा. ब्रह्मदत्तजिज्ञासु, पृ - 21

५. अष्टा., सम्पा. ब्रह्मदत्तजिज्ञासु, पृ - 21

स्वकृतनियमानङ्गीकारेण अल्पाच्तरम् इत्यादिपरनिपातशास्त्राणाम् अनित्यत्वं सूचितम्। तथाहि द्विषां विघाताय इत्यादिश्लोकस्थस्य सौष्ठवौदार्यविशेषशालिनीमिति पदव्युत्पत्तिं निरूपयता मल्लिनाथसूरिणा घण्टापथे प्रदर्शितम् – **'अत्र औदार्यशब्दस्य अजाद्यन्तत्वे अपि लक्षणहेत्वोः क्रियायाः इत्यत्र अल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातम् अकुर्वता सूत्रकृता एव पूर्वनिपातशास्त्रस्य अनित्यत्वज्ञापनात् न पूर्वनिपातः। उक्तञ्च, काशिकायाम् – अयमेव लक्षणहेत्वोः इति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्'**[६] इति। अतो दिनकरी-प्रभा-मञ्जूषाणामिति पदं व्याकरणसम्मतमिति। किञ्च, मद्गवेषणबन्धस्य अनुबन्धचतुष्टयमप्यत्र वक्तव्यमिति न्यायपदार्थतत्त्वजिज्ञासुरधिकारी, विषयः न्यायपदार्थतत्त्वम्, प्रयोजनम्, न्यायपदार्थतत्त्वज्ञानम् सम्बन्धश्च प्रतिपाद्यप्रतिपादकभावसम्बन्धः इति बोध्यम्।

अधो दिनकरीप्रभामञ्जूषाणां कीदृशं मतवैमत्यं सुलभं तस्यदिङ्गात्रमुदाह्रियते – तत्र स्वकृतस्य **नूतनेत्यादि**कारिकास्थमङ्गलस्य सफलत्वं स्थापयितुकामो विश्वनाथ आदौ ग्रन्थादौ मङ्गलनिबन्धननिबन्धनमाह – **"विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति**..."[७] इति। टीकाकृद्भिः पङ्क्तिनिरूढार्थं निरूपयद्भिः पदसाधुत्वं बहुधा व्याहृतम्। तथाहि विघ्नविघाताय पदघटकीभूतविघातपदनिष्पत्तिः कथमिति चेद् विपूर्वकाद् हन्तेर्घञा इति। नाशः, उत्पत्तिमदभाव इति तदर्थः। ननु घातपदस्यैवोत्पत्तिमदभाववाचकत्वाद् विपदस्यानर्थक्यमित्याशङ्क्य महादेवेन दिनकरीये समाधिर्गदितः – **"यद्यपि अत्र**

---

**[६] किरा., सम्पा. क्षितीशचन्द्रच्याटार्जी, पृ39**

**[७] . का. व., सम्पा. शङ्कररामशास्त्री, पृ-10**

**घातपदस्योत्पत्तिमदभावपरतया प्रतिभाति तथापि विशिष्टवाचकानां पदानां पृथक् विशेषणवाचकपदसमवधाने, विशेष्यमात्रपरतायाः स कीचकैर्मारुतपूर्णरन्ध्रैः इत्यत्र कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः इति कोशपर्यालोचनया मारुतपूर्णरन्ध्रत्वविशिष्टबेणुबोधक-कीचकपदे दृष्टत्वात्, घातपदमभावमात्रपरं द्रष्टव्यम्।"**[८] इति। विशिष्टवाचकानां पदानां पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम् इति न्यायात् उत्पत्तिविशिष्टाभाववाचकस्य विशिष्टवाचकस्य घातपदस्य उत्पत्त्यर्थके विपदे सति अभावरूपविशेष्यमात्रपरत्वम्। अत्र कालिदासशिष्टप्रयोगा हि प्रमाणम्। तथाहि स कीचकैर्मारुतपूर्णरन्ध्रैः ... इत्यत्र कीचकपदार्थो हि मारुतपूर्णरन्ध्रत्वविशिष्टवेणुरिति। तथाहि आमरी गीः – ***कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः*** इति। ननु कीचकपदप्रयोगेणैव मारुतपूर्णरन्ध्रत्वविशिष्टबोधनाद् मारुतपूर्णरन्ध्रत्वविशेषण-मनर्थकम् इति चेदत्र विशिष्टवाचकानां पदानां पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम् इति न्यायात् पृथग् विशेषणवाचकपदप्रयोगात् विशेष्यवाचकस्य कीचकपदस्य वेणुरूपविशेष्यमात्रबोधकत्वम्। तथाहि दिनकरीये – **"स कीचकैर्मारुतपूर्णरन्ध्रैः... इत्यत्र कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः इति कोशपर्यालोचनया मारुतपूर्णरन्ध्रत्वविशिष्टवेणुबोधककीचकतपदे दृष्टत्वात्, घातपदमभावमात्रपरं द्रष्टव्यम्।"**[९] इति।

मञ्जूषकृता महादेवकृतसंशीतिस्तच्छित्तिश्च भूयसा तिरस्कृता। तथाहि उपसर्गा हि द्योतका न तु वाचका इति न्यायनयः। तथाहि जागदीशी गीः –

---

[८]. तत्रैव, पृ10 – 14
[९]. तत्रैव, पृ- 12-14

**“प्रादयस्तूपसर्गा न सार्थकाः”**[१०] इति। वीत्यपुसर्गस्य द्योतकत्वेन शक्तत्वाभावान्न पदत्वमिति पदत्वमाश्रित्य **विपदमनर्थकम्** इत्याक्षेपस्तथा **विपदं सार्थकमिति** समाधिर्निर्युक्तिकः। न चाक्षेपसमाधी उपसर्गाणां वाचकत्वपक्षमाश्रित्यात्रेति वाच्यम् स्वसम्प्रदायसिद्धान्तविरुद्धत्वात्। तथाहि मञ्जूषाकृतागादि – **“अथैवमपि विपद-मित्ययुक्तम् उपसर्गाणां द्योतकत्वेन शक्तत्वरूपपदत्वासम्भवात्। ... केचित् उपसर्गाणां वाचकत्वपक्षमवलम्ब्येदमुक्तं महादेवेनेति समादधते। स्वपरमतभेदपरिज्ञानविधुरो महादेव इत्यभिधानस्यैव पर्यायान्तरमिदं समाधानं, द्योतकत्वनैयायिकमते विशब्दद्योत्यार्थस्याव्यावर्तकत्व-परिहाराभावश्च।”**[११] इति। न च **वा गतिबन्धनयोः** इति वाधातोः औणादिकेन इत्प्रत्ययेन निष्पन्नो विशब्दः लक्षणया उत्पत्त्यर्थक इत्यपि वाच्यं, गत्यर्थकधातोः उत्पत्त्यर्थकत्वस्य विरुद्धत्वात्।

अपि च, आकाशद्रव्यनिरूपणानन्तरं विश्वनाथेन कारिकावल्यां कालं निरूपयता उक्तम् -

**‘जन्यानां जनकः कालो जगतामाश्रयो मतः।’**[१२] इति।

कालं च निरूप्य कालसद्भावे प्रमाणमुपस्थाप्य पुनः प्रमाणान्तरमुपस्थापयता उक्तम् –

**‘परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः।’**[१३] इति।

---

[१०]. श.श.प्र. सम्पा. ढुण्ढीराजशास्त्री, पृ. 56
[११] . का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ-11
[१२]. भा.प., सम्पा. पञ्चाननभट्टाचार्य, पृ-196
[१३] .तत्रैव, पृ-198

युक्तिभिः विश्वनाथेन एकः काल इति साधितः। ततश्च कालस्य एकत्वे किमसौविध्यमित्याशङ्क्य उक्तम् – **'नन्वेकस्य कालस्य सिद्धौ क्षणादिनमासवर्षादिसमयभेदो न स्यादित्यत आह – क्षणादिः'**[१४] इति। अस्या एव पङ्क्तेः व्याख्यानार्थं दिनकरीकृतागादि – **'ननु यदि काल एक एव तदा क्षणलवकाष्ठादिनानाव्यवहारस्तत्र न स्यात्। न चैकस्मिन्नेव घटे घटः कलशः कुम्भ इति व्यवहारवदत्रापि क्षणादिनानाव्यवहारे बाधकाभाव इति वाच्यम्। एकस्मिन् विरुद्धनानाव्यवहारायोगात् न हि घटत्वकलशत्वादिकं मिथो विरुद्धं क्षणत्वादिनत्वादिकं तु विरुद्धमेव न हि क्षणं दिनमिति प्रतीतिरस्तीत्याशङ्कते।'**[१५] इति।

दिनकरीकाराशयो हि – घटः कलशः कुम्भः इत्यादिशब्दानां विरुद्धनानाधर्मावच्छिन्नाबोधकत्वाद् एकस्मिन्नेव घटे घटः, कलशः, कुम्भः इत्येनेके शब्दाः प्रयुक्ता भवन्ति। परं क्षणः, लवः, काष्ठा इत्यादिशब्दानां क्षणत्वलवत्वादिरूपविरुद्धनानाधर्मावच्छिन्नबोधकत्वात् एकस्मिन् काले क्षणलवादिनानाशब्दप्रयोगः असम्भवः। इत्येतत्सर्वाम् आशङ्कां मनसि निधायैव विश्वनाथेन **'नन्वेकस्य कालस्य सिद्धौ'** इत्यादिवचनं निगदितम् इति दिनकरी-कारस्य महादेवस्य मतम्।

दिनकरीकारमतं न सहते प्रभाकरः। तन्नये एकस्मिन् काले क्षणलव-काष्ठादिविरुद्धनानाधर्मावच्छिन्नप्रयोगरूपां दिनकरीकारोक्तामाशङ्कां मनसि निधाय

---

१४. तत्रैव, पृ-200

१५ . का.व., सम्पा. शङ्कररामशास्त्री, पृ-374

ग्रन्थकृता विश्वनाथेन नन्वेकस्य कालस्य इत्यादिकमुक्तम् इति न युक्तम्, यतो हि क्षणत्वदिनत्वादीनां मिथो विरोधे मानाभावः। तथाहि तदुक्तिः – **केचित्तु ननु लाघवादेककालसिद्धौ क्षणदिनादिविरुद्धनानाव्यवहारो न स्यात् नहि क्षणत्वदिनत्वादिकमविरुद्धं तथा सति दिनं क्षण इकि व्यवहारापत्तेरित्यभिप्रायेण क्षणादिः स्यादिति मूलमवतारयति नन्वित्यादिनेत्याहुः तदसत् क्षणत्वदिनत्वादीनां विरुद्धे मानाभावात्। वस्तुतस्तु नन्वेककालसिद्धौ क्षणादिविभिन्नव्यवहारो न स्याद् व्यवहर्तव्यभेदाभावादित्यभिप्रायेण मूलमवतारयति।**[१६] इति।

इत्थमन्येषु अपि विषयेषु दिनकरीप्रभामञ्जूषाणां मतवैमत्यं लभते।

किञ्च, एतयोः प्रभा-मञ्जूषा-दिनकरीयाणां समीक्षणमभूतपूर्वमदृष्टचरञ्च। अतः प्रसङ्गेऽस्मिन् तादृशप्रबन्धबन्धप्रयत्नः अस्मदीयः एतादृशशोध-कर्मणामितराणां प्रयासान्तराणां न सर्वथान्यथासिद्धिहेतुरपि तु द्वारमेवेत्यस्मदाशयः।

[१६]. तत्रैव, पृ-374

# अथ प्रथमः अध्यायः

प्रथमे अध्याये न्यायसिद्धान्तमुक्तावलीमूल्याङ्कणम्। तत्र कारिकावल्याख्याकरग्रन्थकर्तृणां सुकृतिनां विश्वनाथसिद्धान्तपञ्चाननानां कालप्रदेशादिपरियचप्रख्यापनपुरःसरं तदीयकृतीनां परिचयः अतिस्वल्पः उपन्यस्तः। तथा समं तेनैव न्यायसिद्धान्तमुक्तावलीमाहात्म्यविषयविन्यासादिविषयनिचयाः निरूपिताः।

- **विश्वनाथसिद्धान्तपञ्चाननपरिचयः**

सुरभारतीसमुपासकानां सुप्रतिष्ठितसिद्धान्तन्यायपञ्चाननाद्यनेकविरुदावलिविभूषितानां श्रीमदाचार्य्यप्रवराणां प्रकाण्डपण्डितश्रीविश्वनाथन्यायपञ्चाननमहाभागानां पुण्यतमपरिचयं ख्यापयितुकामस्य नूनं मे समुल्लसति हृदि कोऽप्यपूर्व आनन्दसन्देहोद्रेकः।

खृष्टियसप्तदशशतके पश्चिमबङ्गप्रदेशे नदीयाख्यमण्डलान्तर्गते गुणिग्रामे कस्मिंश्चिद्ग्रामे त इमे विद्यावधूवरा आचार्यविश्वनाथसिद्धान्तपञ्चानना साक्षाद्विद्यानिवासश्रीविद्यानिवासपण्डितप्रवरात् स्वजनुषा विभूषयामासुः नवद्वीपधराम्। तथाहि न्यायसूत्रवृत्तिप्रणयनावसरे स्वेनैवावादि –

**“अद्वैतं गुरुधर्मयोरिव लसत्क्ष्मामण्डलीमण्डनं**

**रूपं किञ्चन पौरुषं गिर इव प्रागल्भ्यसम्पादकम्।**

**दाने कर्णमिवावतीर्णमपरं दीने दयादक्षिणं**

**तातं विश्वविसारिचारुयशसं विद्यानिवासं नुमः।।**[१७]

**विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।**

**विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता।।”**[१८] **इति।**

शैशव एव कुलाचारपरम्परामनुरुन्धाना विधिविहितविद्यारम्भसंस्कार-समारम्भा कुशाग्रधियः अमी महानुभावाः स्वीयप्रदीप्तप्रतिभाप्रभावेण व्याकरणसाहित्यदर्शनादिसर्वशास्त्रेषु अनन्यवैदुषीवैभवं बिभरन्तो निखिलनिगम-निष्णाताः समपद्यन्त।

गौतमगवीगहनारण्यसञ्चारचतुरा महामहोपाध्यायास्ते रत्नाकरविद्या-वाचस्पतेः पौत्राः, श्रीरुद्रन्यायवाचस्पतिभट्टाचार्य्यस्यानुजाः, पण्डितशिरोमणेः रघुनाथशिरोमणेः अनुयायिनस्तथा रघुनाथाचार्य्यवरा वासुदेवसार्वभौमाचार्य्यवराः महाविदुषां ह्येषां ज्येष्ठपितृव्याः। विद्यानिवासस्य पितृप्रदत्तं नाम काशीनाथभट्टाचार्य्य इत्येवं प्रसिद्धिः, विद्यावशंवदत्वाच्च विद्यानिवासेत्युपाधिः। किञ्च, श्रीरुद्रन्यायवाचस्पतिभट्टाचार्य्यः अपि विश्वनाथाग्रजः विद्यानिवासतनुसम्भवो बभूवेति स्वयं तेनैवावादि आख्यातवादटीकायाम् –

**‘विद्यानिवासपुत्रस्य न्यायवाचस्पतेरिदम्।**

**आख्यातवादव्याख्यानमानन्दयतु कोविदान्।।’**[१९] इति।

---

[१७] न्या.सू.वृ. सम्पा. सेख्-साविर-आलि, पृ. - 10 (मङ्गलाचरणम्)

[१८] न्या.सू.वृ. सम्पा. सेख्-साविर-आलि, पृ. – 12 (मङ्गलाचरणम्)

[१९] व. न. च. सम्पा. दीनेशचन्द्रभट्टाचार्य्य, पृ. – 274

किञ्च, खड्दहप्रदेशस्थस्य कुलीनपण्डितप्रवरस्य श्रीयोगेश्वराभिधेयस्य षष्ठतमो वंश्यः रुद्राख्यः कश्चित्सूरिशिरोमणिः। रुद्रस्य कुलपञ्जिकायामेवमुल्लेखः प्राप्यते –

**'रुद्रस्य विवाहः वं विश्वनाथपञ्चाननस्य कन्या, वाराणसीनिवासी।'**[२०] इति।

एतेन प्रमाणितं यत् सिद्धान्तपञ्चाननोपाह्वाः श्रीविश्वनाथा वाराणसीनिवासिनो व्यजीजनन् कन्यामेकाम्। तस्या एवोद्वाहः रुद्रेण सह। किञ्च, विश्वनाथपञ्चानानामेकस्तनयः रामदेवभट्टाचार्य्याख्यः नवरसर्तुशशधरमिते शकाब्दे मुघलसम्राडवरङ्गजीवेन विनाशिते विश्वनाथमन्दिरांशे वाराणसीं परित्यज्य पश्चिमवङ्गप्रदेशान्तर्गते विक्रमपुरमण्डलान्तःपाति-पश्चिमपाड़ा इति ग्राममाजगाम इत्यद्यापि विश्वनाथसिद्धान्तपञ्चाननवंश्यानामावासस्तत्रैव।

एते किल सिद्धान्तपञ्चाननाः सच्चिदनन्दस्यानन्दकन्दस्य नन्दनन्दनस्य मथुराचन्द्रस्य श्रीकृष्णचन्द्रस्य भक्तिभाजनभूताः वृन्दारण्ये सुरम्ये पवित्रतीर्थक्षेत्रे अन्तिमजीवितकालान् अनयन्। तत्रैव श्रीराधारमणचरणपरिचरणपरैस्तैः परमवैष्णवैः गौतमसूत्रवृत्तिर्विरचिता बाणनयनरससुधा-वासेशवीयाब्दे। तथाहि भणितिरियं प्रसिद्धा –

**'अकरोन्मुनिसूत्रवृत्तिमेतां**

**ननु वृन्दविपिने स विश्वनाथः।।'**[२१] इति। अपि च,

---

[२०] **तत्रैव, पृ. – 277 (परिषदः 2102संख्यकमातृकायां पृ. 476)**

**'एषा मुनिप्रवरगौतमसूत्रवृत्तिः**

**श्रीविश्वनाथकृतिना सुगमाल्पवर्णा।**

**श्रीकृष्णचन्द्रचरणाम्बुजचञ्चरीकः**

**श्रीमच्छिरोमणिवचः प्रचरैरकारि।।'**[२२] इति।

तत्कृतौ **'रसवाणतिथौ शकाहे'**[२३] इति निबन्धनादसौ षोडशशताब्द्यां स्वास्तित्वसम्पन्न आसीदिति अनुमितिः। परं केषाञ्चिन्मते सप्तमशताब्द्या मध्यभागे स्वास्तित्वेन सुरसरस्वती सनाथिता। न्यायसूत्रवृत्तिग्रन्थसम्पादनावसरे मदीयाचार्य्यवरैरेष विषयः सुष्ठूपत्तिभिः प्रतिपादितः – গোপীনাথ কবিরাজের মতে বিশ্বনাথ তাঁর অবসর ও আধ্যাত্মিক জীবনের শেষ কয়েক বৎসর বৃন্দাবনে অতিবাহিত করেন। তিনি ন্যায়সূত্রের উপর বৃত্তিটি রচনা করেন ১৫৭৬ শকাব্দে, অর্থাৎ ১৬৫৪ খৃষ্টাব্দে। তবে কোনো কোনো মতে তিনি ১৬৩৪ খৃষ্টাব্দে বৃত্তিটি রচনা করেন। এর থেকে সহজেই অনুমিত হয় যে তিনি সপ্তদশ শতকেই বর্তমান ছিলেন।

अस्य सन्दर्भस्याशयो हि, विश्वनाथसिद्धान्तपञ्चाननैः तदीयावसरस्य तथा आध्यात्मिक-कालस्यान्तिमो भागो वृन्दविपिने अतिवाहित इति गोपीनाथ-कविराजाः। तत्र तत्रभवद्भिर्न्यायसूत्रवृत्तिर्विरचिता। अतः अनुमीयते, सः सप्तदशसतके

[२१] **H.I.L. सम्पा, सतीशचन्द्रविद्याभूषण, पृ. - 392**

[२२] **तत्रैव, पृ. - 392**

[२३] **व. न. च. सम्पा. दीनेशचन्द्रभट्टाचार्य्य, पृ. – 273**

एव बभूव इति। तथात्वे गोपीनाथकविराजाभिमतमाश्रीयते चेत्, नूनं न्यायसिद्धान्तमुक्तावली सिद्धान्तपञ्चाननैः सप्तदश-शताब्द्यामेव श्रीविष्णोर्वक्षसि विन्यस्ता सन्मनोमुदे इत्यवितथं तथ्यं वितन्यते।

किञ्च आम्नायनयनारिशशधरमिते (१६३४) ईशवीयाब्दे एव सिद्धान्त-मुक्तावली विरचितेति विश्वनाथमतम् – **'रसवाणतिथौ शकेन्द्रकाले'**[२४] इति।

तथाहि मन्वत आचार्य्याः –

**'In the colophon of this work he provides information regarding the date of the composition of the work as 1556 *Saka* era (रसवाणतिथौ शकेन्द्रकाले). This date corresponds to 1634 A.D. Hence we may take that Viswanatha flourished during the 17th century A.D.'**[२५] इति।

- <u>**विश्वनाथकृतिकृतिततिपरिचितिः**</u>

ते च महानुभावाः महामहोपाध्यायाः बहून् ग्रन्थान् प्रनिण्युरिति प्रसिद्धिः। तथा हि तत्कृतिषु उल्लेखमर्हन्ति - ***अलंकारपरिष्कारः, नञ्वादटीका, आख्यातवादटीका, न्यायसूत्रवृत्तिः, सुवर्थतत्त्वालोकः, पदार्थतत्त्वालोकः,***

---

[२४] तत्रैव, पृ. 276

[२५] का. व. सम्पा. एन् विळीनाथन्, पृ. – viii (भूमिका)

***पिङ्गलप्रकाशः, कारिकावली न्यायसिद्धान्त-मुक्तावली, न्यायतन्त्रबोधिनी, मांसतत्वविवेकः, तत्त्वज्ञानविवृद्धिप्रकरणम्, उपपत्ति-समाप्रकरणम्*** चेति।

**गौतमसूत्रवृत्तिः** – जीवितस्यान्तिमे भागे वृन्दावने रम्ये चतुस्त्रिंशदधिकषोडशशतके विरचितेयं महर्षिगौतमकृतन्यायसूत्राणां वृत्तिरतिसरला सुगमाल्पवर्णा च। तथाहि न्यायसूत्रगूढार्थ-प्रकाशैकलक्ष्येषु विविधविबुधकृतव्याख्यानग्रन्थेषु श्रीविश्वनाथकृतिनः कृतिरेव प्रशस्यतरा –

**'For a learned and lucid interpretation of the original *sutras* of *Goutama,* no better work is available than *Viswanatha's Nyayasutravritti.*'**[२६] इति।

**न्यायालोकः** – स्वसिद्धान्तानुसारी न्यायसूत्राणामल्पवर्णा अनायाससुगमा एषा बालावबोधाय व्याख्या, सम्प्रति अप्राप्ता। प्रसिद्धमेतद् वृद्धावस्थायां वृन्दारण्ये निवसता श्रीविश्वनाथेन न्यायालोकः विरचितः।

**आख्यातवादटीका** – आख्यातवादस्येयं टीका पुनायां मातृकायां कस्याञ्चित् शिष्टा उपलभ्यते। विश्वनाथाग्रजन्मनो रुद्रन्यायवाचस्पतयः अपि आख्यातवादस्यैकां टीकामरचयत्।[२७] अत्र विश्वनाथसिद्धान्तपञ्चाननैः स्वकीये ग्रन्थे ज्येष्ठस्य रुद्रन्यायवाचस्पतेः सिद्धान्ता भूयशः न्यक्कृताः। यथा

---

[२६] न्या.सू.वृ. सम्पा. सेख्-साविर-आलि, पृ. xviii (भूमिका)

[२७] विद्यानिवासपुत्रस्य न्यायवाचस्पतेरिदम्।
आख्यातवादव्याख्यानमानन्दयतु कोविदान्।।

**'पुष्पवन्तादिवदेकोच्चारणान्तर्भावेन... इत्याहुः, तदपि न'** इत्येवम्। तत्र चेदं ग्रन्थारम्भनिबन्धनशिष्टाचारपरम्पराप्राप्तं मङ्गलं –

**'कठिने निर्माणेऽस्मिन् कौटिल्येनापि सूक्ष्मतरबुद्ध्या।**

**दत्तो दोषोऽपि मुदे कुच इव विहितो नखाघातः॥'**[२८] इति।

<u>**नञ्वादटीका**</u> – गदाधरभट्टाचार्य्यस्य नञ्वादस्य विश्वनाथकृतिकृता इयं टीका मातृकाकारेण पुनायां संरक्षिता। तस्यां मातृकायां ***'संवत् १७/९'*** इत्युल्लेखदर्शनात् द्विपञ्चाशदधिकषोडशेशवीयाब्दे तथा नवलयहयाकाशमिते शकाब्दे एवास्याः प्रणयनमिति लिपिविदुषः। तत्र चादौ ग्रन्थस्य मङ्गलम् –

**'लज्जमानेवाभिमुख्ये श्रुतिश्रेणी नवाङ्गना।**

**यदाह नेति नेत्येव तन्नौमि परमं महः॥'**[२९] इति।

ग्रन्थसमाधावपीत्थं गीतम् –

**'मदुक्तं युक्तं चेद्भजत सदयं नैवमिति चेद्**

**उपेक्षध्वं द्वेषो यदि भवति संदूषयत तत्।**

**परं त्वस्मन्नामग्रहणरहितं यो लिखति तत्**

**तथाचेष्टो दुष्टः स भवतु जगत्पातकनिधिः॥'**[३०] इति। ततश्च,

---

[२८] **व.न.च. सम्पा. दीनेशचन्द्रभट्टाचार्य्य, पृ. - 276**

[२९] **तत्रैव**

[३०] **तत्रैव**

**'विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।**

**विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता।।**

**इति महामहोपाध्यायश्रीमद्विद्यानिवासभट्टाचार्य्यात्मजश्रीविश्वनाथ-सिद्धान्तपञ्चाननभट्टाचार्य्यकृता नञ्वादव्याख्या समाप्ता।'**[३१] इति।

<u>**पदार्थतत्त्वालोकः**</u> – पदार्थतत्त्वावलोकः ***तत्त्वालोक*** इति अभिधानान्तरभाजन-मिदमपूर्वं रघुनाथशिरोमणेः ***पदार्थतत्त्वनिरूपण***स्य वृत्तिरूपं कर्म विश्वनाथकृतिनः। एतस्याः टीकायाः उपलभ्यमानाया मातृकाया असम्पूर्णायाः पुष्पिकायां *विश्वनाथसिद्धान्तपञ्चानन* इति उल्लेखः प्राप्यते। अयञ्चातिपाण्डित्यप्रकर्षपूर्णः सन्दर्भ इति विदुषां बुद्धिव्यायामजनकः। ग्रन्थे मङगलाचरणमित्थम् –

**'त्वच्चिन्तारहितेन तावकमहामायाविमूढात्मना**

**संसारार्णवदुर्निवारलहरीजालेषु मोमुह्यता।**

**विद्योर्जत्सदसद्विवेकरहितेनेदं मया वर्णितं**

**तेनानेन पदार्पितेन भगवान् प्रीणातु नारायणः।।'**[३२] इति।

<u>**सुवर्थतत्त्वालोकः**</u> - अयं हि सन्दर्भः विश्वनाथग्रथितः ***कारकचक्रे***त्यभिधयापि सुधी-समाजे प्रसिद्धः।

---

[३१] तत्रैव

[३२] तत्रैव

**<u>न्यायतन्त्रबोधिनी</u>** – तर्कसंग्रहव्याख्यानमिदं विश्वनाथानां स्वतन्त्रनिबन्धनं शास्त्रान्तरीय-विषयनिचयान् हृदि निधाय काणादन्यायमतप्रक्रियापटलसंघटनेन विनिर्मितमिति प्रसिद्धिः।

**<u>पिङ्गलप्रकाशः</u>** – प्राकृतपिङ्गलटीकेति प्रसिद्धायाः मातृकायाः पुष्पिकायां ***'विद्यानिवासात्मज'*** इति आकलनाद् विश्वनाथनिबद्धोऽयं बन्ध इति मतिर्मतिमताम्।

**<u>मांसतत्त्वविवेकः</u>** – काश्यामयं मुद्रापितः प्रहसनप्रायः कोतुकजनको बन्धो सिद्धान्तपञ्चाननस्वकपोलकल्पितः, यत्र सौगतप्रियस्य निरामिषाशिनः मांसमत्स्याशिना विहितः आमिषाशनविषयकशास्त्रीयविचारा विचारिताः। किंवदन्ती ह्येषा, एतस्य बन्धस्य निबन्धनानन्तरमेव विश्वनाथन्यायपञ्चाननः अपि मांसमत्स्याशनत्यागेन ***'निरामिषठाकुर'***[३३] इति परिचितिमगात्। किञ्च, अद्यावधि तदीयवंश्या अपि तदुपाधिना एवाभिधीयन्ते।

वेदान्तसिद्धान्तनिराकरणेनाक्षपादसिद्धान्तस्थापनाय सिद्धान्तपञ्चाननैः ***भेदसिद्धिः*** इति प्रबन्धः काश्यामध्यापनकाले निबद्धः। किञ्च, विंशत्यधिकशतकारिकाकाया ***सूक्तिमुक्तावली***ति विकानीरप्रदेशे मातृकारूपेणोपलब्धं सहृदयहृदयानन्दसन्दोहसन्दायकं खण्डकाव्यमपूर्वमनुपमं विश्वनाथकृतिना विन्यस्तमिति खण्डकाव्यस्था कारिकैव प्रमाणम् –

[३३] तत्रैव, पृ. - 277

**'विद्यानिवासपुत्रेण विश्वनाथेन निर्मिताम्।**

**कण्ठे कुर्वन्तु ते सन्तः सूक्तिमुक्तावलीमिमाम्।।'**[३४] इति।

एवम् ***अलंकारपरिष्कारः***, ***तत्त्वज्ञानविवृद्धिप्रकरणम्***, ***उपपत्तिसमा-प्रकरणमि***त्यपि विश्वनाथकृतिकृतयः यद्यपि न दुष्प्राप्या तथाहि अस्माभिरप्राप्तत्वान्नेह तत्तद्ग्रन्थस्थ-विषयादिविचारावसर इति अस्मद्दौर्भाग्यं तथा अस्मदसाफल्यासौष्ठवे एवेति शिवम्।

**कारिकावली** – प्रत्यक्षानुमानोपमानशब्दस्मरणमनोगुणैः सप्तभिः प्रकरणैः, अष्टषष्ट्युत्तरशत (168) कारिकाभिश्च पूर्णः अयं वैशेषिकः प्रकरणग्रन्थः भाषापरिच्छेदापरनामा मद्रास-बम्बाई-वाराणसी-कलकत्तादिषु स्थलेषु मुद्रितः। दर्शनमात्रप्रसिद्धानां पदार्थानां भाषाशब्देन व्यवहारः। ते च पदार्थाः अत्र लक्षणादिभिः परिच्छिद्यन्त इति ग्रन्थस्यास्य भाषापरिच्छेद इति साम्प्रदायिकं नाम सार्थकं भवति। तर्कभाषायां गद्यात्मिकायां वर्णिता वैशेषिकदर्शनानुगताः सामान्यविषया अत्र कारिकारूपेणोपवर्णिताः। नामैकदेशे नामग्रहणमिति न्यायेन भाषाशब्देनात्र तर्कभाषा निर्दिष्टा तद्गताश्च विषयाः परिच्छिद्यन्त इति भाषापरिच्छेदनाम सार्थकं भवतीति कथनमपि रोचते।

**कारिकावल्याः व्याख्याः –**

अनन्तनारायणशर्मणा (1800 AD) कृता काचन कारिकावलीव्याख्या अमुद्रिता मीरजापुरस्थव्रजभूषणपुस्तकालये, व्रजराजगोस्वामिना (1800 AD) कृता

---

[३४] तत्रैव

काचन व्याख्या मीराजपुरस्थगोविन्दभट्टपुस्तकालये, चामुद्रिता लभ्येते । एवम् एकोनविंशतिशतकीयेन (1831 AD) कृष्णकौरमिश्रसुतेन देवीसहायमिश्रेण कृता ***कण्ठाभरणा***ख्या कारिकावलीव्याख्या निर्णयसागरमुद्रणालये मुद्रिता या कारिकावलीव्याख्याव्याजेन मुक्तावल्युक्तान् विषयान् सुगमैस्सुकुमारैश्च शब्दैः प्रदर्शयन्ती क्वचित् क्वचित् सर्वात्मना मुक्तावलीपङ्क्तीरेवानुसरन्ती दृश्यते। एवं मुकुन्दशर्मणा (1911 AD) कृता ***अन्वितार्थप्रदीपिका***ख्या कारिकावलीव्याख्या बम्बईनगरे मुद्रिता च। एवमन्या ***मुक्तावतंसा***ख्या व्याख्यापि अमुद्रिता मद्रपुरीप्राच्यपुस्तकालये लभ्यते।

**न्यायसिद्धान्तमुक्तावली** –

नवद्वीपवासिनः वासुदेवसार्वभौमभ्रातू रत्नाकरविद्यावाचस्पतेः पौत्रो विद्यानिवासस्य पुत्रः रुद्रवाचस्पतिभट्टाचार्यभ्राता न्यायालोकन्यायसूत्रवृत्तिकर्ता विश्वनाथन्यायसिद्धान्तपञ्चाननः न्यायसिद्धान्तमुक्तावल्याः कर्ता। सप्तदशशतके (1600 AD) राजीवाख्यस्वशिष्यस्य दयावंशवदो भूत्वा कारिकावल्याः व्याख्यात्मिकां न्यायसिद्धान्तमुक्तावलीं व्यरचीति प्रसिद्धम्। परं वन्दरगारप्राच्यविद्यापुस्तकालये विश्वनाथन्यायसिद्धान्तपञ्चाननेन (1611 AD) कृता काचन ***उल्लासा***ख्या सिद्धान्तमुक्तावलीव्याख्या अमुद्रिता विद्यते। एवम् आसियाटिकसोसाइटि-परिरक्षिते मुक्तावल्या आदर्शग्रन्थे –

**'विष्णोर्वक्षसि कृष्णदासकृतिना सिद्धान्तमुक्तावली विन्यस्ता।'** इति पाठो दृश्यते। एतत्सर्वं पर्यालोच्य च विश्वनाथेन उल्लासाख्या व्याख्यैव कृता,

मुक्तावली तु आलोकव्याख्याप्रसारिणीकर्त्री कृष्णदाससार्वभौमेन (1575 AD) कृता स्यादिति ज्ञायते। केनापि कृष्णदासस्थाने विश्वनाथशब्द अनवधानात् लिखित इति च सम्भाव्यते। विपरीतकल्पना तु असम्भाविनी, उभयोः कालभेदात्, स्वकृतव्याख्यायाः पुनर्व्याख्याकरणासम्भवाच्च। वङ्गे नव्यन्यायचर्चा इति ग्रन्थे दीनेशचन्द्रभट्टाचार्य्येणापि एतस्य मतस्यैव बलवत्ता प्रतिपादिता।

किन्तु मुक्तावलीसम्पादनावसरे पञ्चाननभट्टाचार्य्यशास्त्रिणा तथा न्यायपरिचयादिग्रन्थे फणीभूषणतर्कवागीशमहाभागैर्महामहोपाध्यायैः अयं विषयः यत्नतः सरसगिरा सविशदमालोच्य विविधयुक्तिजातोपस्थापनैः मुक्तावल्याः विश्वनाथकर्तृत्वमेवोपन्यस्तम्। तत्सर्वं तत्रैव द्रष्टव्यं, सिद्धसाधनभिया नेह चर्वितं चर्व्यते।

## • न्यायशास्त्रे न्यायसिद्धान्तमुक्तावल्याः स्थानं महत्त्वञ्च

न्यायवैशेषिकदर्शनप्रकरणग्रन्थेषु अनन्यः सुप्रसिद्धश्च न्यायसिद्धान्तमुक्तावलीग्रन्थः। श्रीविश्वनाथपञ्चाननेन अष्टषष्ट्यधिकशतकारिकाभिः कारिकावली इत्याख्यः कश्चन ग्रन्थो व्यरचि। अस्याः कारिकावल्या नामान्तरं हि भाषापरिच्छेद इति। ततश्च ग्रन्थकारेण विश्वनाथेन एव बहुकालादनन्तरं सवस्य राजीवनामकस्य प्रियशिष्यस्य सुखबोधाय कारिकावल्या व्याख्यानरूपा न्यायसिद्धान्तमुक्तावली लिखिता। तेनैव न्यायसिद्धान्तमुक्तावल्याः प्रारम्भे एवोक्तम् –

**‘निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः।**

**विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः॥**[३५] इति।

विश्वनाथो हि राजीवदयाधीनः सन् कणादगौतमादीनां मतानि अवलम्ब्य अर्थभूयिष्ठैः संक्षिप्तशब्दैर्न्यायसिद्धान्तमुक्तावलीं विरचितवान्। अत्र निजनिर्मितेत्यादिकारिकास्थस्य चिरन्तनपदस्य कणादगौतमादयः अर्थाः। विश्वनाथवचनाद्धि एतत्प्रमाणितं यत् विश्वनाथविरचितो न्यायसिद्धान्तमुक्तावलीग्रन्थो हि न्यायवैशेषिकोभयदर्शनसम्मतविषयप्रतिपादनपरकः।

‘प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते’ इत्यादिभिः शास्त्रीयवचोभिः प्रेरिता आचार्या विश्वनाथन्यायपञ्चानना अपि न्यायसिद्धान्तमुक्तावल्याः प्रारम्भे एव स्वग्रन्थपाठे श्रोतृप्रवृत्तये अनुबन्धचतुष्टयं निरूपितम्। तत्र अधिकारी, विषयः, सम्बन्धः प्रयोजनश्चेति चत्वारि अनुबन्धनानि। तथाहि न्यायसिद्धान्तमुक्तावल्याः अनुबन्धविषये विश्वनाथेन न्यगादि –

**‘सद्रव्या गुणगम्फिता सुकृतीनां सत्कर्मणां ज्ञापिका**

**सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला।**

**विष्णोर्वक्षसि विश्वनाथकृताना सिद्धान्तमुक्तावली**

**विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम्॥’**[३६] इति।

---

[३५] **का.व. सम्पा. पञ्चाननभट्टाचार्य्यशास्त्री, पृ. - 2**

[३६] **तत्रैव, पृ. - 3**

सद्रव्या, गुणगुम्फिता, सत्कर्मणां, ज्ञापिका, सत्सामान्यविशेषनित्यमिलिता, अभाव-प्रकर्षोज्ज्वला, सद्युक्तिः, एषा सिद्धान्तमुक्तावली विश्वनाथकृतिना विष्णोर्वक्षसि विन्यस्ता सती सुकृतीनां मनसः मुदं चिरं वितनुतामित्यन्वयः। अस्मिन् ग्रन्थे द्रव्याद्यभावान्तपदार्थप्रतिपादकत्व-प्रदर्शनेन द्रव्यादयः विषया उक्ताः। अत्र पदार्थतत्त्वावधारणं च प्रयोजनं निरूपितम्। किञ्च, प्रतिपाद्यप्रतिपादकभावाख्यः सम्बन्धः सूचितः, पदार्थतत्त्वावधारणकामोऽधिकारीति सूचितम्।

ननु ग्रन्थादावेव वैशेषिकसम्मताः पदार्थास्सप्त निरूपिता इति कथमस्य ग्रन्थस्य न्याय-वैशेषिकदर्शनप्रकरणत्वम् इति चेदुच्यते यद् यद्यपि प्रारम्भे वैशेषिकसम्मताः पदार्थास्सप्त समालोचितास्तथापि ग्रन्थमध्ये न्यायशास्त्रोक्तानि चत्वारि प्रमाणानि हि निरूपितानि। अतः न्यायसिद्धान्तमुक्तावलीग्रन्थस्य न्यायवैशेषिकप्रकरणत्वं युक्तिसिद्धमेव। किञ्च, अस्मिन् ग्रन्थे नव्यन्यायस्य जटिला पारिभाषिका च भाषा विषयोपस्थापनार्थं प्रयुक्ता दृश्यते। अस्मिन् ग्रन्थे गौतमकणादादीनां प्राचामाचार्याणां तथा गङ्गेशोपाध्यायादिनव्यानां मतानि सविशदं समालोचितानि दृश्यन्ते।

<u>न्यायसिद्धान्तमुक्तावल्याः विषयविचनेन महत्त्वं प्रतिपाद्यते</u> –

न्यायसिद्धान्तमुक्तावली ग्रन्थे विश्वनाथेन मङ्गलवादमुपक्षिप्य मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापादेवेति विषयः सिद्धान्तितः। संसारमहीरुहस्य बीजायेति मूलग्रन्थव्याख्याव्याजेन ईश्वरानुमानं वर्णितम्। उपमानचिन्तामण्युक्तशक्ति-सादृश्यादीनाम् अतिरिक्तपदार्थत्वाभावः,

पदार्थोद्देशः, द्रव्यत्वजातौ प्रमाणम्, तमसः अतिरिक्तद्रव्यत्वाभावः, गुणकर्मोद्देशः, सामान्योद्देशलक्षणविभागः, विशेषनिरूपणम्, समवाय-सिद्धिः, अभावोद्देशलक्षण-विभागः, पदार्थानां साधर्म्यम्, पारिमाण्डल्यादीनां कारणत्वनिषेधः, कारणलक्षणविभागौ, अन्यथासिद्धिविभागः, गुणकर्मणोस्साधर्म्यवर्णनम्, द्रव्यसाधर्म्यकथनम्, आकाशात्मनोस्साधर्मनिरूपणम्, अव्याप्यवृत्तिक्षणिकत्वयो-र्विचारः, सामान्यतो द्रव्यगुणकथनम्, पृथिवीलक्षणम्, अवयवसिद्धिः, पार्थिवशरीरविचारः, पार्थिवेन्द्रियनिरूपणम्, जलनिरूपणम्, तेजोलक्षणम्, सुवर्णस्य तैजस्त्वम्, वायुलक्षणविभागादिकथनम्, आकाशकाल-दिगात्मनिरूपणम्, आत्मनः प्राणभिन्नत्वम्, बुद्धिविभागः, प्रत्यक्षलक्षणविभागादिकथनम्, घ्राणजनयनज-प्रत्यक्षवर्णनम्, ज्ञानसामान्यहेतुत्वकथनम, निर्विकल्पकज्ञानस्यातीन्द्रयत्वकथनम्, लौकिकसन्निकर्षनिरूपणम्, योग्यानुपलब्धिनिरूपणम्, सामान्यलक्षणाज्ञानलक्षणा-योगजप्रत्यासत्तिकथनम् इत्येते विषयाः प्रत्यक्षखण्डे वर्णिताः।

अनुमितिकारणपरामर्शनिरूपणम्, पूर्वपक्षसिद्धान्तव्याप्तिनिरूपणम्, पक्षता-निरूपणम्, हेतुप्रसङ्गाद् हेत्वाभाससामान्यलक्षणविशेषलक्षणे साधारणादि-व्यभिचार-विरुद्ध-असिद्ध-सत्प्रतिपक्ष-बाधानां लक्षणमित्येते विषया अनुमानखण्डे विचारिताः। परं पञ्चावयवात्मको न्यायस्तु न प्रतिपादित इति विशेषः।

करणव्यापारवर्णनपूर्वकमुपमानं निरूपितमुपमानखण्डे। शब्दखण्डे तावत् करणव्यापारसहितशाब्दबोधवर्णनम्, शक्तिस्वरूपश्कत्ग्राहकोपायवर्णनम्, जाति-शक्तिवादः, यौगिकादिशक्तपदविभागः, लक्षणालक्षितलक्षाविचारः लाक्षणिक-

पदस्याननुभावकत्ववादिनां प्राचां मतम्, तस्यानुभावकत्वमिति नवीनमतम्, समासे लक्षणयैव निर्वाहात् शक्त्यस्वीकारः कर्मधारयसमासे लक्षणानङ्गीकारे युक्तिः, शाब्दहेत्वासत्तिरूपम्, आसत्तिभ्रमाच्छाब्दबोधभ्रम इति मतनिरासः खले कपोतन्यायेन एकदा सकलपदार्थबोधः, खण्डवाक्यबोधानन्तरं महावाक्यार्थबोध इति मतद्वयवर्णनम्, प्रसङ्गात् स्फोटवादखण्डनम्, योग्यताज्ञानस्य शाब्दबोधहेतुत्वे युक्तिः, आकाङ्क्षावर्णनम्, तात्पर्यस्वरूपम्, तस्य शाब्दबोधजनकत्वे युक्तिः प्रसङ्गात् प्रलयसाधनमित्येते विषया वर्णिताः।

अवशिष्टेषु खण्डेषु स्मृतिः, मनस्यनुमानप्रमाणम्, मनसः अणुत्वम्, गुणसामान्यलक्षणम्, गुणसाधर्म्यम्, मूर्तामूर्तगुणविभागः विशेषगुणाः, रूपत्वजातिः, चित्ररूपम्, नवीनमते चित्ररूपाभावः, रसगन्धस्पर्शनिरूपणम्, पीलुपाकवादः, क्षणप्रक्रिया, अवयविपाकवादिनां पिठरपाकवादिनां नैयायिकानामाशयकथनम्, संख्यालक्षणविभागौ, परिमाणनाशः, संयोगविभागौ, विभागभेदाः, परत्वापरत्वे, प्रमाप्रमाभेदेन ज्ञानद्वैविध्यम्, संशयनिश्चयौ प्रामाण्यवादे उत्पत्तिवादः, निर्विकल्पकलक्षणम्, प्रामाण्यवादे ज्ञप्तिवादः, पूर्वमनुक्तः प्रमाण्यानुमितिप्रयोजकश्च व्यतिरेकव्याप्तिः अर्थापत्तेः प्रमाणान्तरत्वनिरासः, सुखदुःखे, इच्छालक्षणविभागौ, यत्नः, इष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वस्थापनम्, विध्यर्थविचारः, तस्मिन्नुदयनाचार्यार्थविचारः, वेदस्य पौरुषेयत्वम्, गुरुत्वद्रवत्वस्नेहसंस्कारदीनां लक्षणम्, धर्माधर्मौ तयोर्नाशकस्य च वर्णनम्, शब्दतद्विभागौ चीचीतरङ्गकदम्बमुकुलन्यायेन शब्दसन्तानोत्पत्तिः शब्दानित्यत्ववादश्चेति विषया उपवर्णिताः। उपमानचिन्दामणिः, उदयनद्रव्यकिरणावली, केचिच्छब्देन

रत्नकोषकारः आचार्यशब्देन उदयनश्च अस्मिन् ग्रन्थे निर्दिष्टाः। अतो न्यायवैशेषिकदर्शनयोः कठिनविषयाणां प्रतिपादकत्वाद् ग्रन्थोऽयं महत्स्थानमावहतीति निश्चप्रचम्।

## • सिद्धान्तमुक्तावल्यां प्राचामाचार्याणां ग्रन्थान्तराणाञ्च प्रभावः

न्यायसिद्धान्तमुक्तावल्यां प्राचीनाचार्याणां ग्रन्थान्तराणाञ्च भूयान् प्रभावः वलोक्यते। विश्वनाथपञ्चाननभट्टाचार्यो ग्रन्थोक्तविषयाणां प्रतिपादनकाले कणादगौतमादिप्रचीनाचार्याणां तथा तेषां ग्रन्थानां, ग्रन्थान्तराणां च मतानि प्रतिपादितवान्। पदार्थनिरुपणकाले मीमांसादर्शनसम्मतयोः शक्तिसादृश्ययोः पदार्थत्वं खण्डितम्। सामान्यनिरूपणावसरे उदयनाचार्यप्रतिपादिता जातिबाधका निरूपिताः। आत्मत्वनिरूपणप्रसङ्गे विश्वनाथेन बौद्ध-चार्वाक-वेदान्त-सांख्यादिमतानां खण्डनमकारि। प्रत्यक्षलक्षणनिरूपणावसरे गौतमीयसूत्र-स्यैवालम्बनं कृतं विश्वनाथेन। एवं बहुषु स्थलेषु यथा प्राचामाचार्याणां ग्रन्थान्तराणां च मतोद्धृतेर्न्यायसिद्धान्तमुक्तावल्याः स्थानं सर्वोत्तममित्यत्र नास्ति विचिकात्सा विदुषाम्।

## • न्यायसिद्धान्तमुक्तावल्या रचनाशैली

न्यायसिद्धान्तमुक्तावल्या रचनाशैली ह्युत्तमा सुगमा अत्यन्तमनोरमा च। न्यायसिद्धान्तमुक्तावल्यां पदार्थास्तर्कसंग्रहदिशा प्रतिपादिता विश्वनाथेन। लक्षणविभागादिकमपि तथैव प्रतिपादितम्। अस्मिन् ग्रन्थे प्राचीनानाम् आचार्याणां

मतानां बहुलतया समालोचनात् तत्तद्ग्रन्थग्रथितविषयज्ञाने भूयान् सहायकः अयं ग्रन्थः। अस्मिन् ग्रन्थे बहुत्र नव्यन्यायस्य अवच्छेदकादिपारिभाषिकभाषाप्रयोगः अपि महान्तमुपकारं विदधाति अध्येतृणाम्। उदाहरणमत्र यथा –

द्रव्यत्वजातिसिद्ध्यर्थं विश्वनाथेन न्यगादि – '**कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः**'[३७] इति। व्याप्तिनिरूपणावसरे निरुक्तम् – '**प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूत-हेत्वधिकरणवृत्त्यभाव-प्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्।**'[३८] इत्यादि। एवं हि पक्षताप्रकरणे, परामर्शप्रकरणे, हेत्वाभासप्रकरणे, अन्यत्र बहुषु च स्थलेषु नव्यन्यायस्य परिभाषिकभाषाप्रयोगो लक्ष्यते। अतो न्यायशास्त्रे न्यायसिद्धान्तमुक्तावल्या महत्त्वमधिकं विद्यत इत्यत्र नास्ति संशयलवः।

- **न्यायसिद्धान्तमुक्तावल्याः टीकाः**

विविधैर्विबुधैर्मुक्तावल्या नैकाष्टीका आटीकिताः। तेषां नामग्राहमुल्लेखः अधः –

1. **बालकृष्णभट्टस्य – प्रकाशः**
2. **महादेवदिनकरयोः – दिनकरी।**
3. **त्रिलोचनस्य – त्रिलोचनी।**

[३७] **तत्रैव, पृ. - 32-34**
[३८] **तत्रै, पृ. – 360-362**

4. रामरुद्रस्य – रौद्री, दिनकर्याः रामरुद्री च।

5. बिन्ध्येश्वरीप्रसादस्य – मुक्तावलीटीका (अज्ञातनामा)।

6. कल्याणस्य – मुक्तावलीटीका (अज्ञातनामा)।

7. गदाधरभट्टाचार्यस्य – मुक्तावलीटीका (अज्ञातनामा)।

8. द्राविडनृसिंहशास्त्रिणः – प्रभा।

9. पट्टाभिरामशास्त्रिणः – मञ्जूषा।

10. मुकुन्दशर्मणः – अभिनवप्रभा।

11. छज्जुरामशास्त्रिणः – मूलचन्द्रिका।

12. सूर्यनारायणशुक्लस्य – मयूखः, पञ्चनदीयप्रभा च।

13. श्रीकृष्णवल्लभाचार्यस्य – किरणावली।

14. श्रीज्वालाप्रसादगौडस्य – कृष्णा, विलासिनी (हिन्दी) च।

15. आनन्दचन्द्रसार्वभौमस्य – आनन्दमयी।

16. लल्लूरशर्मणः – विषमस्थला।

17. दुर्गादत्तशास्त्रिणः – मनोरमा।

18. कुञ्जविहारीतर्कसिद्धान्तशर्मणः – व्याखा

19. अम्बिकादत्तप्रसादशर्मणः – समन्वयाख्या व्याख्या

20. नृसिंहदेवस्य – प्रभा।

21. हरिदत्तशर्मणः – कामदुघा।

22. चन्द्रधरसिंहस्य – चन्द्रिका।

23. पञ्चाननभट्टाचार्यस्य – मुक्तावलीसंग्रहः।

# अथ द्वितीयः अध्यायः

द्वितीये अध्याये तु अनुदिनकरीयमाहात्म्यवैशिष्ट्यादिविषयवितानं तदीयपरिच्छेद-विषयोपन्यासोपन्यासः। ततो भट्टमहादेवदिनकरयोर्दिनकरीयकारयो-रन्वयकीर्त्त्यादिकीर्तनम्।

## ● मुक्तावलीव्याख्यासु दिनकर्य्याः स्थानं वैशिष्ट्यं च

**'असम्प्रदायवित्सर्वशास्त्रविदपि मूर्खवदुपेक्षणीयः'** इति श्रीभगवच्छङ्करगिरं स्मारं स्मारं मणिदीधित्योस्तत्त्वाधिगतिर्दुष्करा सुकुमारधियामिति तेषामसम्प्रदायविदां मूर्खत्वनिराकरणकामनया विनायासं बालव्युत्पत्तिसिद्धये मण्याद्याशयमनुसृत्य कणभक्षाक्षचरणसिद्धान्तजातसंक्षेपरूपं भाषापरिच्छेदापराभिधं सिद्धान्तमुक्तावलीसमाख्यव्याख्यासमेतकारिकावल्याख्य-महानिबन्धं बबन्धे विद्यानिवाससूनुर्महामहोपाध्यायविश्वनाथन्यायपञ्चाननः। अनुकारिकावलीविन्यासं राजीवाख्यदौहित्रबोधसौकर्य्याय कौतुकान्निरमायि कारिकावलीव्याख्यां मुक्तावलीसमाख्यामिति स्थितिः। वस्तुतः श्रीविश्वनाथ-पञ्चाननस्याधमर्णं सर्वमेव नैयायिकवैशेषिकवृन्दम्, किं बहुना पण्डितप्रवर-कुलमेवेत्यस्य महानिबन्धस्य विषये विशेषतः किं वा भाष्यम्?

भाषापरिच्छेदनिगूढतत्त्वप्रकाशार्थं नैकैर्विद्वद्भिरनेका टीका आटीकिताः। तासु महादेव-दिनकरकृता ***दिनकरी***, द्राविडरायनृसिंहशास्त्रिरचिता ***प्रभा*** प्राचीना, नृसिंहशिष्यपट्टाभिरामशास्त्रिणो ***मञ्जूषा***, सूर्यनारायणशुक्लकृत***मयूख-पञ्चनदीय-***

***प्रभा***, छज्जुरामशास्त्रिणः मूल***चन्द्रिका***, कृष्णवल्लभाचार्य्यस्य ***किरणावली*** च सर्वा अतिशय्य विद्योतन्तेतमाम्। क्वचिट्टीकास्वपि टीकाटिप्पणीक्रोडपत्रादयः अनुवादा भाषान्तरव्याख्या अपि वर्तमानकाल-वृत्तित्वं यन्ति। तथापि सिद्धान्तमुक्तावल्याः सकलासु एतासु टीकासु व्याख्यासु च दिनकर्य्या एव माहात्म्यमनिन्द्यमनुपममनवद्यं सर्वातिशायि अद्वितीयम्।

इयं दिनकरी बालकृष्णभट्टसूनुना भारद्वाजवंशावतंसेन वागदेवतामानसात्मजेन तत्रभवता श्रीमता महादेवभट्टाचार्य्येण समारब्धा तथा महादेवतनूजन्मना श्रीमता दिनकरभट्टेन दिनकरभक्तेन प्रपूरिता। अस्याः एव सिद्धान्तमुक्तावलीप्रकाशः इति संज्ञापरा।

नव्यन्यायेऽधीतीनां सूत्रभाष्यवार्त्तिकतात्पर्यटीकादीनामध्ययनजनितां न्यूनतां दुरूहताञ्चापनयत्येष मुक्तावलीप्रकाशः। न केवलमेतदेव चार्वाकमीमांसाबौद्ध-वेदान्तवैशेषिकादिदर्शनप्रस्थानप्रपञ्चिततत्त्वानां तथागमश्रुतिशब्दशास्त्रनामलिङ्गा-नुशासनानाम् उल्लेखपुरःसरं विचारविश्लेषणैः तत्तत्तत्त्वानां न्यूनतादुरूहतातमोऽपि नूनं नाशयत्ययं प्रकाशः। युक्तमुक्तं खलु दिनकरीकारेण दिनकरेण – **'परिभाव्य च शास्त्रसारं'**[३९] तथा **'ज्ञात्वाशेषमतम्'**[४०] इति। बहुत्रैव प्रकृतविषयविवरणावसरे पूर्वपूर्वाचार्यसिद्धान्ता अपि सयुक्ति सरलतयोपवर्णिताः यथा पदार्थनिरूपणावसरे एव – **'भाष्यस्यार्षत्वाशङ्क्य मणिकृतां सम्मतिमाह'**[४१] इत्यादिना न्यायभाष्य-कारस्य महर्षेर्वात्स्यायनस्य मणिकर्त्तुर्गङ्गेशस्य च मतानि सोपपत्ति प्रपञ्चितानि,

[३९] का. व. सम्पा. शङ्करशास्त्री, पृ. - 547

[४०] तत्रैव, पृ. - 1

[४१] तत्रैव, पृ. - 35

एवमन्यत्रापि। गोलोकीत्यादिषु क्रोडपत्रग्रन्थेष्वपि दिनकरीपङ्क्त्युद्धरणं तन्माहात्म्यमेवोद्घलयतीति महद्वैशिष्ट्यमस्य। किं बहुना, दिनकर्य्या एतावत्युपयोगिता विद्वत्प्रियता च यद्रामरुद्र्यादिकारास्तथा नैके टीकाकारा दिनकरीव्याख्याने निरता इति महद्गौरवमस्याः। तथाहि रामरुद्रीति प्रसिद्धा रामेश्वरभट्टात्मजरामरुद्रभट्टप्रणीता तरङ्गिणी, गङ्गारामयतिकृता गङ्गारामीयेति प्रथिता विद्वत्प्रिया क्रोडपत्रटिप्पणी, सुबोधिनी, अज्ञातकर्तृके दीपिका-गूढार्थप्रकाशिके चेति प्रकाशव्याख्यात्मककृतयः।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः। अतः सुकृतिभिर्बहुभिरेव व्याख्यातृभिर्बहुशः बहुधा च प्रकाशः स्थलविशेषेषूपहसितः, क्वचिच्च तन्मर्दनप्रयाससाहसः अपि प्रदर्शितः, परं वस्तुस्थितिमालोचयतां नयज्ञानां मर्मज्ञानाञ्च पुरतः तादृशप्रकाशावरोधावहासादिप्रयत्नो विफल एवेति नास्ति विशयलवोऽपि विषयेऽस्मिन्।

## • दिनकर्याः परिच्छेदविन्यासः

परिच्छेदविन्यासविश्लेषणाज्ज्ञायते, मुक्तावलीप्रकाशः साकल्येनाष्टपरिच्छेदात्मकः। आदितः सामान्यद्रव्यगुणनिरूपणं यावत् प्रथमपरिच्छेदः, यत्र पदार्थानां द्रव्याणाञ्च साधर्म्यवैधर्म्ये सोपपत्ति प्रतिपादिते। द्वितीयः परिच्छेदस्तु पृथिवीनिरूपणादारभ्यात्मस्वरूप-निरूपणं यावत्। प्रत्यक्षपरिच्छेदाख्ये तृतीयपरिच्छेदे बुद्धिनिरूपणादारभ्य प्रत्यक्षखण्डं यावत् समे विषया विमृष्टाः। तुरीयपरिच्छेदस्तु अनुमाननिरूपणादारभ्य हेत्वाभासनिरूपणपर्यन्तं, यत्रानुमितिपरामर्शव्याप्तिपक्षताहेत्वाभासाः साङ्गोपाङ्गमुपवर्णिताः। उपमानपरिच्छेदाख्यः

पञ्चमपरिच्छेदो हि उपमानखण्डः केवलः। शब्दपरिच्छेदाख्ये षष्ठे परिच्छेदे खलु शब्दखण्डादारभ्य शब्दप्रमाणशक्तिग्रहोपायशाब्दबोधहेतवः विषया विन्यस्ताः। सप्तमः परिच्छेदस्तु तत आरभ्य स्मृतिप्रक्रियानिरूपणं यावत्। ततः अन्तिमः अष्टमपरिच्छेदः मनोनिरूपणाख्यः यदनन्तरं परिच्छेदान्तरं न विहितम्। किन्तु परिच्छेदाभावेऽपि गुणलक्षणादारभ्य आग्रन्थसमाप्ति गुणनिरूपणप्रकरणं कल्पनीयम्, यत्र प्रत्येकगुणानां साधर्म्यवैधर्म्यप्रतिपादनपुरःसरं गुणस्वरूपप्रतिपादनं परिलक्ष्यते।

आदित आद्यं परिच्छेदपञ्चकं महादेवभट्टप्रपञ्चितम्। शब्दखण्डादारभ्य ग्रन्थसमाप्तिं यावत् परिच्छेदत्रितयस्य तथा गुणनिरूपणप्रकरणस्य कारको दिनकरभट्टाचार्य्य एव।

## • दिनकरीकारप्रत्यभिज्ञा

न्यायसिद्धान्तमुक्तावल्याः भाषापरिच्छेदापराभिधावत्याः प्रसिद्धटीकासु नैकासु दिनकरीति कृतिर्माहात्म्येन सर्वा अतिशेतेतमाम्। केचिदिमां दिनकरीयेति नाम्नाप्याप्नुवन्ति। अस्या एव सिद्धान्तमुक्तावलीप्रकाश इत्यप्यभिधापरा प्रसिद्धा।

सिद्धान्तमुक्तावल्या दिनकरीतीयं महानिबन्धो निबद्ध आचार्य्यवरेण महादेवभट्टेन नैयायिकश्रेष्ठेण। परं तत्रभवता महादेवेनारब्धापीयं प्रपूरिता तदात्मजेन दिनकरभट्टेनैव। वस्तुतः दिनकरप्रपूरितत्वेनैवास्या दिनकरीति प्रसिद्धिः। दिनकरीकारद्वयस्य महादेवभट्टस्य तत्सुतस्य दिनकरभट्टाचार्य्यस्य च पितापुत्रोः वंशानुकीर्त्तनं नैतावतापि कुत्रापि साङ्गोपाङ्गमुपवर्णितम्। अतः अधस्तात् सामान्यतस्तदीयगोत्रवंशपरिचयादिप्रदानप्रयत्नः अस्मदीयः –

अष्टपरिच्छेदात्मिकाया अस्या दिनकर्य्या उपमानखण्डान्तान् पञ्चपरिच्छेदानाद्यान् श्रीमहादेवशर्मैव प्रणिनाय, तथा महादेवसुतो दिनकरभट्टस्तु कारकः शब्दखण्डादारभ्य अन्तिमपरिच्छेदत्रितयस्येति दिनकरीपरिच्छेदविन्यास एव मानम्। तथाहि उपमानखण्डान्ते व्याख्यात्रा श्रीमहादेवेन स्वयमेवावादि मुक्तावलीप्रकाशे –

**'इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टविरचिते मुक्तावलीप्रकाशे उपमानपरिच्छेदाख्यः पञ्चमः परिच्छेदः'**[४२] इति।

अपि च, शब्दखण्डसमाधावावादि दिनकरेण –

**'इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टारब्धे तत्पुत्रदिनकरभट्टप्रपूरिते मुक्तावलीप्रकाशे शब्दपरिच्छेदाख्यः षष्ठः परिच्छेदः'**[४३] इति।

अत आदित उपमानखण्डं यावत् प्रकाशो महादेवकाशितः, तथा शब्दखण्डादारभ्य मुक्तावलीसमाप्तिं यावत् दिनकरभट्टाटीकित इति नेह विपश्चितां विचिकित्सावसरः। तथाहि –

**'Mahadeva Bhatta, son of Balakrsna Bhatta wrote the commentary *Muktavali-Prakasha* up to the *Upamana-Khanda*,**

---

४२. तत्रैव, पृ. - 263

४३ तत्रैव, पृ. - 317

**and the remaining sections, the *Sabda-Khanda* and the *Guna-Khanda* were commented upon by his son, Dinakara Bhatta.'**[४४]

महादेवदिनकरयोः महादेवभट्टः पिता, दिनकरभट्टश्च तत्सुत इति विदितचरमेव विदुषाम्। परिच्छेदसमाधिवाक्यसामर्थ्यात् वालकृष्णभट्टः इति कश्चित् पण्डितर्षभः तत्रभवतो महादेवभट्टस्य पिता तथा दिनकरभट्टस्य पितामह इत्यपि प्रतीतिः। एते च भट्टोपाधिधरा अप्रतिमप्रतिभाधराः पण्डितप्रवरा भारद्वाजान्वयसम्भवाः।

प्रकाशापराभिधाया दिनकरीयटीकायाः प्रारम्भ एव महादेवेन स्वयमेव स्वकृते मङ्गले एवं प्रादायि समासेन स्वपरिचयः –

**'लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं**

**भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवास्याम्बुजात्।**

**ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-**

**गूढार्थांस्तनुते यथामति महादेवः परेषां मुदे।।'**[४५] इति।

कारिकायां महादेवभट्टो भारद्वाजगोत्रोद्भव इति सिद्धान्तस्थापनपुरःसरं भारद्वाजवंशावतंसाः शशाङ्क इव प्रथितयशाः श्रीबालकृष्णभट्टाभिधेयाः महासूरयः एव महादेवपितर इति प्रतिपादितम्। परं कारिकायां लक्ष्मीपादयुगप्रणामः सकलविद्वत्कुलविप्रतिपत्तिजनक एव। तथाहि निखिलसम्पदधिष्ठात्री देवी श्रीः श्रीविष्णुप्रिया क्षीरोदतनया लक्ष्मीपदावगम्या आहोस्विद् लक्ष्मीत्युपाह्वा

---

[४४] का. व. सम्पा. एन् विळीनाथन्, पृ. – ix (भूमिका)

[४५] का. व. सम्पा. शङ्करशास्त्री, पृ. - 1

महादेवमातृदेवीति महानयं विशयो विदुषाम्। ननु तथापि 'विद्याव्यसनिनां धनाधिष्ठात्र्या देव्याः प्रणामस्य प्रायेणादृष्टपूर्वत्वात् "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"ति अभियुक्तोक्त्या च पितुः प्रणामात् पूर्वमेव स्वजननीप्रणामनिवेदनमिति सम्भाव्यते।' शास्त्रेष्वपि नूनं प्रसिद्धमेवैतत् – 'पितृतोऽपि गुरुर्माता नास्ति मातृसमो गुरुः।' इति। अतः लक्ष्मीशब्दाभिधेया नूनं श्रीमहादेवमातेति केषाञ्चिदभिमतम्।

यद्यपि भारद्वाजकुलाम्बुधौ पूर्णविधुरिव वैदुष्येण सन्मनोमुदकरोऽभून्महादेवपिता श्रीबालकृष्णभट्टस्तथापि नासौ स्वतनुजन्मनो गुरुवरो बभूवेति कारिका एव प्रमाणम्। तथाहि **'श्रीगौरवास्याम्बुजात्'** इति श्रीगौरवाभिधेयगुरुवरमुखारविन्दात् न्यायशास्त्रीयनयनिचयो महादेवेनाधिगतः। अतः तदीयगुरुचरणाः श्रीगौरवाः पण्डितर्षभा एव। किञ्च, न्यायेतरशास्त्राणामपि पाठः स्वपितुरधिगतो न वेति नोल्लेखलेशमात्रमपि कारिकायाम्। यद्वा भवतु, स्वगुरु-जननी-पितृदेवेषु भक्तिदार्ढ्यम् अनुरागप्राबल्यञ्च अनुरूपमेवाभून्महादेवस्येति कारिकाया अवेयते।

एवं मुक्तावलीप्रकाशसमाधौ दिनकरभट्टः मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते इति फणीभणितं स्मारं स्मारमाचचार शिष्टाचारपरम्पराप्राप्तं मङ्गलम् –

**'भानुं प्रणम्य परिभाव्य च शास्त्रसारं**

**मुक्तावलीकिरण एष पितृप्रदिष्टः।**

**सद्युक्तिभिर्दिनकरेण करेण सोऽयं**

**नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु।।'**[४६] **इति।**

**'मुक्तावलीप्रकाशो यः स्वाज्ञानतिमिरापहः।**

**तेन सन्तोषमायातु नीलकण्ठः सतीप्रियः।।'**[४७] इति।

अत्र कारिकयोः दिनकरभट्टस्य संक्षिप्तपरिचयो वंशानुकीर्त्तनं चोपलभ्यते। कारिकास्थेन **'पितृप्रदिष्ट'** इति पदेन दिनकरभट्टस्य शास्त्रानुशीलनं स्वपितुरेव प्रारब्धम्, तथा दिनकरभट्टप्रपूरितः असौ प्रकाशांशः तदीयपितुः शास्त्रोपदेशस्य फलस्वरूप एवेत्यपि प्रतीयते। आत्मनः आदित्यसमाननामधेयकत्वेन ग्रन्थस्य चादित्यकिरणनामधेयकत्वाद् भगवान् भास्वानेव दिनकरपण्डितवंश्यानामिष्टो देवो वभूवेति मतिर्मतिमताम्। तच्चात्र मङ्गलाचरणे **'भानुं प्रणम्ये'**ति भानुप्रणामादनुमीयते। अपि च, **'स्वाज्ञानतिमिरापहः'** इति पदप्रयोगेण आत्मतत्त्वसाक्षात्कारः मिथ्याज्ञानोन्मूलनद्वारक एव न्यायशास्त्रस्य तथास्य ग्रन्थस्य परमं प्रयोजनमिति वेदयति दिनकरः। न्यायशास्त्राङ्गत्वात् अयमपि ग्रन्थः स्वात्मनः अज्ञानतमः अपहन्तीति युक्तमेवास्य प्रकाश इति संज्ञाविधानम्। किञ्च, **'परिभाव्य च शास्त्रसारमि'**त्यनेन कारिकांशेन दिनकरकाशिते मुक्तावलीप्रकाशे सकलशास्त्रसिद्धान्ता एव न्यूनाधिकतया प्रतिपादिता इति ग्रन्थकर्तुः शास्त्रान्तरेष्वपि अकुण्ठितमतिवैभवं सर्वतन्त्रस्वातन्त्र्यमेव गमयतीति नातिशयोक्तिरेषा। तस्मात् **'सुधियां मुदेऽस्तु'** इति पदप्रयोगः अपि, यतो हि ग्रन्थे सकलशास्त्रसारा इतस्ततो

---

[४६] तत्रैव, पृ. - 547

[४७] तत्रैव, पृ. - 547

विन्यस्ता अतः अयं बन्धो विद्वद्बुद्धिव्यायामकारकः विद्वद्वैदुष्यविलासपरीक्षक इति दिनकरभट्टाशयः। युक्तमुक्तं केनचित्सुधिया –

दिनकरशितिकण्ठौ यस्य कण्ठे लुठेताम्।

स जयति शितिकण्ठं कण्ठशोषं विनैव।। इति।

मुक्तावलीप्रकाशे बहुत्रैव पितापुत्रौ पूर्वाचार्य्याणां सिद्धान्तान् नामग्राहं प्रतिपादयतः। ते चोल्लिखिताः पूर्वाचार्य्याः वैशेषिकसूत्रकाराः कणभक्षाः, अक्षचरणा न्यायसूत्रप्रणेतारः, मणिकारा गङ्गेशोपाध्यायाः, भाष्यकार-वात्स्यायनमहर्षयः, वार्त्तिककारा उद्द्योतकराः, तात्पर्यपरिशुद्धिकर्तार उदयनाचार्य्याः, दीधितिकृतः रघुनाथशिरोमणयः पण्डितशिरोमणयः, मीमांसाधुरन्धराः भट्टकुमारिलपादाः मण्डनमिश्राश्चेत्येते। एते समेऽपि सिद्धान्त-मुक्तावलीकर्तुर्विद्यानिवाससूनोर्विश्वनाथस्य प्राग्भाविनः। विश्वनाथैस्तु सप्तमशताब्द्या मध्यभागे स्वास्तित्वेन सनाथिता देवी सरस्वती। आम्नायनयनारिशशधरमिते (१६३४) ईशवीयाब्दे एव सिद्धान्तमुक्तावली विरचितेति विश्वनाथमतम् – **'रसवाणतिथौ शकेन्द्रकाले'**[४८] इति।

तथाहि मन्वत आचार्य्याः –

**'In the colophon of this work he provides information regarding the date of the composition of the work as 1556 *Saka* era (रसवाणतिथौ शकेन्द्रकाले). This date corresponds to 1634**

---

[४८] व. न. च. सम्पा. दीनेशचन्द्रभट्टाचार्य्य, पृ.- 276

**A.D. Hence we may take that Viswanatha flourished during the 17th century A.D.'**[४९]

अतो न्यायसिद्धान्तमुक्तावली सप्तदशशताब्द्यामेव सन्मनोमोदवितानाय श्रीविष्णोर्वक्षसि विन्यस्तेति अवितथं तथ्यम्। तथात्वे महादेवदिनकरकाशितः सिद्धान्तमुक्तावलीप्रकाशः अपि नूनं स्वप्रकाशं प्राप सप्तदशशताब्द्या अन्तिम एव। यतः अष्टादशशताब्दीप्रारम्भ रामरुद्रभट्टैर्निबद्धा मुक्तावलीप्रकाशस्य रामरुद्रीसमाख्यानुपमा व्याख्या। तस्मात् केषाञ्चिन्मते पितापुत्रौ महादेवदिनकरौ सप्तदशशताब्दीशेषांशे नवत्यधिकषोडशसहस्रेशवीयाब्दे (१६९०) मुक्तावलीप्रकाशं विरचयांचक्रतुः। यद्वा भवतु, सप्तदशशताब्द्या मध्यान्तिमभागे तथाष्टादशप्रारम्भे च पितापुत्रावास्तामिति तयोः समयः।

अपि च, एवमपि श्रूयते भारद्वाजवंशावतंसाः श्रीबालकृष्णभट्टाः महादेवभट्टपितरः सप्तदशशताब्द्या मध्यभागे सिद्धान्तमुक्तावल्याः प्रकाशाख्यव्याख्यां प्रथमं किञ्चिद्रचयामास। ते च बालकृष्णभट्टा विश्वनाथन्यायपञ्चानन-समकालवर्त्तिनः इत्यपि केचित्।

महादेवभट्टैः न्यायसूत्रवृत्ते***र्मितभाषिणी***समाख्यव्याख्या, सिद्धान्तमुक्तावल्याः ***मुक्तावलीप्रकाशः*** तथा ***योगसूत्रवृत्ति***र्विरचिताः। दिनकरभट्टैस्तु ***तर्कभाषा-कौमुदी***ति टीकाटीकिता तथा ***मुक्तावलीप्रकाशः*** प्रपूरित इत्येव प्रसिद्धिरित्यलं पल्लवितेनेति शिवम्।

---

[४९] का. व. सम्पा. एन् विळीनाथन्, पृ. – viii (भूमिका)

# अथ तृतीयः अध्यायः

प्रभाव्याख्यातृपरिचयमुखेन प्रारब्धेऽस्मिन् तृतीये अध्याये क्रमेण प्रभाकृन्मञ्जूषाकृतोरन्वयपरिचयः तदीयकीर्त्तिततिः तथा प्रभामञ्जूषयोः माहात्म्यं वैशिष्ट्यञ्चोदितम्।

वस्तुतः प्रभाकृद्द्राविडरायनृसिंहशास्त्रिपरिचयलाभाभावाद्वयमपीह तद्विषये अमुखरा एव। मञ्जूषाकारा अभिरूपतमाः श्रीपट्टाभिरामास्तु नितरां सुपरिचिताः सुप्रसिद्धा एव। एवं क्रमेणेह तेषां अन्वयपरिचयः प्रदीयते –

- **प्रभाकारपरिचयः**

बालकृष्णतर्कालङ्कारभट्टाचार्य्याणामन्तेवासिनालूरिवंशावतंसेन पण्डितप्रवरेण श्रीनृसिंहशास्त्रिणा प्रभाख्या व्याख्या काचनानुपमा विविच्य मूलभाववर्णनेन व्याख्याभेदप्रदर्शनेन दिनकरीनिग्रहमूला विहिता। श्रूयते अपरः कश्चिद्बभूव नृसिंहाख्यो पण्डितमूर्धन्यो योऽपि मुक्तावलीव्याख्यां प्रभाख्यामपराञ्चकार। अतः पण्डितसभासु अयं महानवसरो विवादाय प्रभाकर्तॄणां परिचयमादाय।

केचिदेनं महासूरिनं द्राविडं वदन्ति, केचिच्च वदन्ति तस्योपाधिः राय इति।

अयं नृसिंहदेवशास्त्री हि बालकृष्णतर्कालङ्कारभट्टाचार्यस्यासीच्छिष्यः। नृसिंहदेवशास्त्रिणः तर्कसंग्रहदीपिकाया व्याख्यानरूपाया नृसिंहप्रकाशिकायाः पुष्पिकावाक्याद् ज्ञायते यत् नृसिंहशास्त्री आरुरुवंशे प्रादुर्बभूव। तथाहि नृसिंहप्रकाशिकायाः पुष्पिकाव्याख्यामुक्तम् –

**'इति महोपाध्यायश्रीबालकृष्णतर्कालङ्कारभट्टाचार्यसद्गुरुप्रसादलब्धविद्यावैभवश्रीमदारूरुवंशपयःपारावारराकासुधाकररायनरसिंहपण्डितकृतदीपिकाप्रकाशः सम्पूर्णः।'**[५०] इति।

परं न्यायसिद्धान्तमुक्तावल्याः व्याख्याया प्रभायाः पुष्पिकानुसारं नृसिंहदेवशास्त्री आलूरवंशे जनिं लेभे। तथाहि प्रभायाः पुष्पिकायाम् उक्तम् – **'इति महोपाध्यायश्रीबालकृष्णतर्कालङ्कारभट्टाचार्यसदुरुप्रसादलब्धविद्यावैभवश्रीमदालूरिवंशपयःपारावारराकासुधाकररायनरसिंह पण्डितकृतमुक्तावलीप्रभा सम्पूर्णा।'**[५१] इति। एन् वीलिनाथन्-महोदयमते तु रायनृसिंहशास्त्री आलूरिवंशज आसीत्। तथाहि तेनोक्तम् –

**'Rayanarasimha Shastri (1900 A.D) of Aluri family wrote the commentary entitled, Prabha.'**[५२] इति।

---

५० . त.सं.दी., सम्पा. सत्करिशर्मा, पृ- 428

५१. का. व., सम्पा. शङ्कररामशास्त्री, पृ-854

५२. का. व., सम्पा. एन्.वीलिनाथन्., पृ-viii

अस्य समयकालो विद्वभिः 1800-1900 A.D. मध्ये गण्यते। अस्य विद्वत्तल्लजस्य कृतिषु प्रमुख्या हि – तर्कसंग्रहदीपिकायाः व्याख्या ***नृसिंहप्रकाशिका*** तथा न्यायसिद्धान्तमुक्तावल्याः व्याख्या ***प्रभा***।

तत्र तर्कसंग्रहदीपिकायाः व्याख्याया नृसिंहप्रकाशिकायाः प्रारम्भिके मङ्गलाचरणे तेनोक्तम् –

**'ध्यात्वा श्रीमातृपादाब्जे दीपिकायाः प्रकाशिका।**

**श्रीरायनरसिंहेन पण्डितेन चिकीर्ष्यते।।'**[५३] इति। मातृभक्तो हि नरसिहः मातृपादवन्दनं विधाय तर्कदीपिकाया व्याख्यां कर्तुं प्रवृत्तः।

किञ्च, अयं नृसिंहरायदेवः कामाक्षीदेव्याः पदपाथोजे पादाब्जे ध्यायं ध्यायं मुक्तावलीप्रभां रचयितुं प्रवृत्तः। तथाहि प्रभाया मङ्गलश्लोके गदितं तेन –

**'कामाक्षीपदपाथोजे जप्त्वा मुक्तावलीप्रभा।**

**श्रीरायनरसिह्माख्यपण्डितेन चिकीर्ष्यते।।'**[५४] इति।

नृसिंहदेवस्य ग्रन्थद्वयस्थं मङ्गलाचरणद्वयं सूक्ष्मेक्षिकया पर्यालोच्य वक्तुं शक्यते यत् स हि नृसिंहरायदेव आसीत मातृभक्तः, तस्या मातुर्नाम हि

---

[५३]. त.सं.दी., सम्पा. सत्करिशर्मा, पृ- 81
[५४]. का. व., सम्पा. शङ्करामशास्त्री, पृ-1

कामाक्षीति। अथवा कामाक्षीदेव्या एव परमभक्तः अयं नृसिहंरायदेवशास्त्रीति। प्रभाटीकाविषये ग्रन्थान्ते नृसिंहदेवशास्त्रिणैवोक्तम् –

**'तर्कदुर्गममहारण्यवर्त्मानुवर्तिनी**

**मुक्तावलीप्रभा हर्षं सतां वितनुतां सदा।।'**[५५] इति।

प्रभाटीका हि सदा सर्वथा नव्यन्यायानुसारिणी। एतस्य प्रमाणं प्रतिपदमेव सुलभम्। तथा च यत्र दिनकरीकृता प्राचां नयानुसारं स्वसिद्धान्त उपस्थापितस्तत्र प्रभाकृता महताडम्बरेण नव्यमतासिना चिच्छेद इति प्रभाया औत्कर्षं सर्वदा विजयतेतमाम्। ललितपदविन्यासैः प्रतिपदम् अवतारिकाप्रदानम्, विविच्य मूलभाववर्णनम्, व्याख्याभेदप्रकाशनम्, स्वोक्तिप्रामाण्याय सूत्रभाष्यारब्धेभ्यः गादाधर्यन्तेभ्यो ग्रन्थेभ्यः प्रमाणप्रदर्शनम्, मूलस्थवाक्यानां नव्यशैल्या शाब्दबोधपरिष्कारो यत्र तत्र दिनकरीयखण्डनमित्येते विषया व्याख्याया अस्या अवधेयांशाः।

- **<u>श्रीपट्टाभिरामशास्त्रिपरिचयः</u>**

ते हि अप्रतिमप्रतिभाधरा मञ्जूषाकारा अभिरूपतमाः शास्त्रिश्रीपट्टाभिरामा महामहोपाध्यायाः मीमांसकशिरोमणयः सर्वतन्त्र-स्वतन्त्रपण्डितसार्वभौमानां श्रीमच्चिन्नस्वामिमीमांसाधुरीणानामन्तेवासिनः

---

[५५]. तत्रैव पृ-854

योग्यतमास्तनयोपमाः श्रीमतीलक्ष्मीदेवी-कृष्णनाथतनुसम्भवा अहिलय-नवेन्दुमितेशवीयाब्दे स्वजनुषा मध्यप्रदेशं सुरवागुपासनया च विभूषयामासुः विदुषां प्रदेशं वाराणसीप्रदेशम्। एषामादिनिवासः मद्रासप्रदेशप्रान्ते काञ्चीमण्डलान्तर्गते पैलाशूर इति भूभागे। श्रीकृष्णनाथशर्मण आसन् आकडजिलायामारक्षकाधीक्षका इति किंवदन्ती।

काश्यां बाल्यादेवामुनाध्ययनतपोरतेन सुरसरस्वती देवीसरस्वती सकलज्ञानाधिष्ठात्री च युगपत्सनाथिता। मीमांसासाहित्यतर्ककोष-व्याकरणादिवैतरणीं विनायासं ससम्मानं तीर्त्वा एते केषुचिदेव दिवसेषु महामहोपाध्यायाः पदवाक्यप्रमाणपारावारपारगाः अपि स्मोदीर्यन्ते। काशीस्थाः समेऽपि सूरयः तदीयाखिलशास्त्रानुशीलनजन्यपरिशीलित-पाण्डित्यप्रकर्षतां प्रेक्ष्य तत्कालमेव काशीस्थस्य हिन्दुविश्वविद्यालयस्या-चार्यतां तस्मा अनुमोदयामासुः। ततः कियत्कालं तत्र सद्विद्यावंशं वितन्य जयपुरसंस्कृतमहाविद्यालयस्याध्यक्षपदं तैरलङ्कृतम्। शास्त्रिणां वैदुष्यकीर्त्ति-गीतिर्जेगीयमानाशासु दशसु सुदूरजयपुरत इह कलिकातामण्डलस्थानां सुरसरस्वतीसमुपासकसहृयानाम् अपि चेतश्चाञ्चल्यमजनयन्। ततः कियत्कालं कलिकाताविश्वविद्यालये अपि महानुभवैः शिष्यबुद्धिवैशारद्यं सम्पादयद्भिः सहृदयहृदयाह्लादः भृशमुत्पादितः। अनन्तरं तादृशप्रकाण्ड-पण्डितसाहचर्यं कामयमानानामामन्त्रणमङ्गीकृत्य वाराणसीसंस्कृतविश्व-

विद्यालयस्याचार्यपदमलंचिकीर्षया तत्रस्थविभागाध्यक्षपदमेवालंकुर्व्वाणा स्ववैदुष्यभासा वाराणसीमेवायोजयन्। अपि च, कियद्दिवसेभ्य एवानन्तरं शिष्यजिज्ञासाशमनाय युगपद्योगतन्त्रविभागयोरपि सानन्दमाध्यक्षं सर्वतन्त्रस्वतन्त्रैस्तैर्निरूढम्। एते वाग्देवतामानससम्भवा महानुभवाः महामहोपाध्यायास्तिरुपतिस्थसंस्कृतविद्यापीठस्य प्रतिष्ठातारस्तथा प्रथम-कुलपतयः अपि। पट्टाभिरामशास्त्रिणां वैदुष्यवैदुर्यभाभासिता तदीयसूक्ति-परिमललुब्धाः मुग्धाः बहुत्राभवन्, अतस्तैरपि बहुत्रैव तदीयज्ञानाम्बुराशिना शिष्यजिज्ञासावह्निर्निर्वापिता। किं बहुना, शिष्यैः सम्माननविज्ञापनार्थं तन्नाम्नैव राष्ट्रियसंस्कृतविद्यापीठस्थकेन्द्रियग्रन्थागारनामधेयमकारि ***महामहोपाध्यायपट्टाभिरामशास्त्रिग्रन्थागार*** इति।

किंवदन्ती ह्येषा, स्वगुरुवरैर्मिलित्वा प्रायेण षष्टिः ग्रन्थास्तैः सम्पादिताः, येषां ***ताण्ड्यमहाब्राह्मणं, शतपथब्राह्मणं, जैमिनीयन्यायमाला, मीमांसाकुतूहलम्, मीमांसाशास्त्रमाला, आपस्तम्बगृह्यसूत्रम्, आपस्तम्बधर्मसूत्रम्, आपस्तम्बश्रौतसूत्रम्, वैदिकशिक्षादर्शनबिन्दुः, शास्त्रदीपिका प्रभासहिता, यज्ञतत्त्वप्रकाशः, तौतातिकमततिलकमिति*** चोल्लेखमर्हति। स्वकृतिततिषु ***वेदप्रकाशः, कृत्यकल्पतरुः, बृहती, त्रिंशच्छलोकी, संस्कारविज्ञानम्, भाट्टप्राभाकरमतभेदविमर्शः, श्रौतपाठः, तर्कदीपिकाया व्याख्या***

***पट्टाभिरामटिप्पणी, न्यायसिद्धान्तमुक्तावल्या व्याख्या मञ्जूषा, तन्त्रसिद्धान्तरत्नावली*** च विशिष्टाः। स्वतन्त्रतया तत्रभवद्भि-र्वासुदेवदीक्षितकृताध्वरमीमांसाकुतूहलवृत्तेः, व्यासशिक्षायाश्च सम्पादनं सम्पादितम्। बहवश्च तद्ग्रन्था अद्यापि अमुद्रिता अप्रकाशिता मातृकारूपेण प्राप्यन्ते, केचिच्च प्रकाशं प्राप्यापि करालकालग्रासं गता इति नातिशयोक्तिः।

अद्याप्यखण्डे उत्तरार्यावर्त्ते मीमांसामीमांसाप्रसाराय श्रीपट्टाभिरामनाम सश्रद्धं सादरं शिरस्सु सूरिभिर्धार्यते। स्वकृतये सर्वोत्तमैः राष्ट्रपतिपुरस्कारैः (Certificate of honour) अप्रतिमप्रतिभाधरास्ते मीमांसकशिरोमणयः सर्वतन्त्रस्वतन्त्रपण्डितसार्वभौमा विभूषिताः। किञ्च, द्व्यशीत्यधिकोन-विंशशततमे वर्षे (1982) सर्वकारैः पद्मभूषणभूषणैर्भूषिता इमे लोकाभिरामा पट्टाभिरामाः। युक्तमुक्तमुत्तरप्रदेशराज्यपालेन चिन्नारेड्डीमहाभागेन कस्यचिद्ग्रन्थस्यामुखे –

**‘I consider it a privilege that I have been given the opportunity to write the preface to this learned work compiled by an eminent scholar, Pandit Shri Pattabhirama Sastri. Pandit Sastri is a profound of Sanskrit language, literature and philosophy**.’

सर्वतन्त्रस्वतन्त्राणां पट्टाभिरामाणां न्यायशास्त्रविषयकं मौलिकं कृतिद्वयं हि – तर्कसंग्रहव्याख्या पट्टाभिरामटिप्पणी, तर्कसंग्रहदीपिकाव्याख्या पट्टाभिरामप्रकाशिका तथा न्यायसिद्धान्तमुक्तावल्या व्याख्या मञ्जूषा। टिप्पण्यास्तथा टीकाया मङ्गलश्लोकद्वयाज्ज्ञायते यदिमे शास्त्रिणः शिवस्य तथा दक्षिणामूर्तेर्भक्तिपरायणा आसन्। तथाहि पट्टाभिरामप्रकाशिकाया मङ्गले शिववन्दनम् –

**'इन्द्रादिवृन्दारकवृन्दमूर्ध्नि भ्राजिष्णुकोटीरमणिप्रभाभिः।**

**नीराजिताम्भोरुहपादपीठं वन्दे शिवं स्वेष्टफलागमार्थम्।।'**[५६]

इति।

प्रभाया मङ्गलश्लोके दक्षिणामूर्तेः स्तुतिर्लक्ष्यते –

**'प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम्।**

**मुक्तावलीस्थावाक्यार्थनिरुक्तिः क्रियते मया।।'**[५७] इति।

शास्त्रिमहोदयैः स्वरचिताया मञ्जूषाटीकाया प्रयोजनमपि निरूपितम्। तन्नये मुक्तावली हि प्राक्तनाचार्यरचितापव्याख्यानरूपधूलिमलमलिनेति तत्क्षालयितुं मञ्जूषा विरचिता। तथाहि तदुक्तिः –

---

[५६]. त. सं. दी., सम्पा. सत्करिशर्मा, पृ- 81

[५७]. का. व., सम्पा. शङ्कररामशास्त्री, पृ - 1

**'मुक्तावलीमनेकप्राक्तनटीकादुरुक्तिधूलिमलात्।**

**गोयतादियं मे तार्किकसिद्धान्तरत्नमञ्जूषा।।'**[५८] इति।

अस्माच्च श्लोकादेतदपि विज्ञायते यन्मञ्जूषाया नामान्तरं हि तार्किकसिद्धान्तरत्नमञ्जूषा इति। अस्मिन् विषये एतदप्यवधेयं यत् प्रभाकर्तुर्नृसिंहशास्त्रिशिष्येण तर्कसंग्रहदीपिकाटिप्पणीव्युत्पत्तिवादव्याख्या-कर्त्रा पट्टाभिरामशास्त्रिणा कृता व्याख्येयं आकाशस्य तु विज्ञेयो शब्दो वैशेषिको गुण इति आकाशग्रन्थपर्यन्तमेव मुद्रिता। प्रसङ्गे अस्मिन् विदुष एन्.वीलिनाथन्-महोदयस्याप्यनुरूपं हि मतम् – **'Another commentary entitled *Manjusa* or *Tarkikasiddhantaratna-manjusa* is incomplete and it extends up to the portion dealing with akasha in the pratyaksa-khanda.'**[५९] इत्यलं पल्लवितेनेति शिवम्।

---

[५८]. तत्रैव पृ-1

[५९]. का. व., सम्पा. एन्.वीलिनाथन्., पृ-ix

## अथ तुरीयोऽध्यायः

## न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्

- **न्यायसिद्धान्तमुक्तावल्या मङ्गलवादे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्**

प्रत्यक्षखण्डे द्रव्यादिसप्तपदार्थानां तथा पृथिव्यादिनवद्रव्याणां व्याख्यानं दृश्यते। आत्मनो निरूपणादनन्तरं बुद्धेर्निरूपणमकारि विश्वनाथेन। अस्मिन् खण्डे चतुर्षु प्रमाणेषु केवलं प्रत्यक्षप्रमाणस्य निरूपणं दृश्यते। प्रमाणान्तराणां तथा गुणादीनाम् अवशिष्टविषयाणां प्रतिपादनं न्यायसिद्धान्तमुक्तावल्याः अनुमानादिखण्डान्तरे लक्ष्यते। अथ प्रत्यक्षखण्डे निरूपिततत्त्वेषु दिनकरीप्रभामञ्जूषाणां समीक्षणं तुलनात्मकं वितन्यते –

**आद्यं समीक्षणम् -**

कारिकावल्याः श्रीकृष्णनमस्कारात्मकं मङ्गलं हि नूतनेत्यादि। मुक्तावल्यास्तु मङ्गलं भवनमस्कारात्मकं चूडामणीकृतविधुरित्यादिकम्। तथा हि –

**"चूडामणिकृतविधुर्वलयीकृतवासुकिः।**

**भवो भवतु भव्याय लीलाताण्डवपण्डितः।।"**[६०] इति।

[६०]. न्या.सि मु. सम्पा. श्रीकृष्णवल्लभाचार्य, पृ-1

ननु वाक्यार्थज्ञानं प्रति पदार्थधियो हेतुत्वनियमात् मुक्तावली-मङ्गलार्थवितानात्प्रागेव तन्मङ्गलघटकीभूतपदानामर्थनिरूपणपरा हि व्याख्यातारः। तत्र च व्याख्येयमेकमपि मङ्गलं व्याख्यातृबुद्धिवैषम्यात् स्वारस्यवैचित्र्याच्च भिन्नं भिन्नं प्रपञ्चितम्। तथाहि कारिकार्थं प्रपञ्चयद्भिर्महादेवभट्टपादैरगादि – **"अचूडामणिः चूडामणिः सम्पद्यमानः कृतः चूडामणिकृतः विधुर्येन स तथोक्तः। वलयीकृतेति। अवलयः वलयः सम्पद्यमानः कृतः वलयीकृतो वासुकिर्येन स तथेत्यर्थः।"**[६१] इति।

परमीरितं तन्मतं निराकुर्वता प्रभाकृता यथा भूधातोः असाधारणधर्मरूप-तादात्म्यवाचकत्वं तथा सम्पूर्वकपद्धातोरपि असाधारणधर्मरूपतादात्म्यवाचकत्वम्। तथा च यथा रामः सम्पद्यत इत्यस्य रामवृत्तितादात्म्याश्रय इति बोधः। तेन अचूडामणिः चूडामणिः सम्पद्यते इत्यस्य, अवलयो वलयः सम्पद्यते इत्यस्य च यथाक्रमं चूडामणिवृत्तितादात्म्याश्रय इति, वलयवृत्तितादात्म्याश्रय इति च शाब्दबोधो बोध्यः। किन्तु अचूडामणिः चूडामणिः सम्पद्यमानः (कृतः) चूडामणीकृतः इत्यत्र समासार्थघटकीभूत-कृतशब्दार्थस्य विग्रहवाक्यार्थे अप्रवेशात् समासस्यास्यासाधुता समासविग्रहयोस्तुल्यार्थकत्व-नियमात्। तथाहि उक्तम् प्रभाकृता –

**"यत्तु महादेवः अचूडामणिश्चूडामणिस्सम्पद्यत इति चूडामणीकृतः इति विग्रहः इति। तत्तुच्छं सम्पूर्वकपद्यतेरक्भवते-रिवासाधारणधर्मतादात्म्याश्रय-वाचकतया शुक्लो भवति शुक्लः सम्पद्यत**

[६१]. का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ-6-7

**इत्यादेः शुक्लवृत्तितादात्म्याश्रय इति बोधजनकत्ववच्चूडामणिः सम्पद्यत इत्यस्यापि चूडामणिवृत्तितादात्म्याश्रय इति बोधजनकत्वेन समास-घटकीभूतकृतशब्दार्थस्य विग्रहवाक्यार्थप्रवेशालाभेन न्यूनतापत्तेः।"**[६२] इति।

**द्वितीयं समीक्षणम् -**

तत्र स्वकृतस्य **नूतनेत्यादि**कारिकास्थमङ्गलस्य सफलत्वं स्थापयितुकामो विश्वनाथ आदौ ग्रन्थादौ मङ्गलनिबन्धननिबन्धनमाह – "**विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति**..."[६३] इति। टीकाकृद्भिः पङ्क्तिनिरूढार्थं निरूपयद्भिः पदसाधुत्वं बहुधा व्याहृतम्। तथाहि विघ्नविघाताय पदघटकीभूतविघातपदनिष्पत्तिः कथमिति चेद् विपूर्वकाद् हन्तेर्घञा इति। नाशः, उत्पत्तिमदभाव इति तदर्थः। ननु घातपदस्यैवोत्पत्तिमदभाववाचकत्वाद् विपदस्यानर्थक्यमित्याशङ्क्य महादेवेन दिनकरीये समाधिर्गदितः – "**यद्यपि अत्र घातपदस्योत्पत्तिमदभावपरतया प्रतिभाति तथापि विशिष्टवाचकानां पदानां पृथक् विशेषणवाचकपदसमवधाने, विशेष्यमात्रपरतायाः स कीचकैर्मारुतपूर्णरन्ध्रैः इत्यत्र कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः इति कोशपर्यालोचनया मारुतपूर्णरन्ध्रत्वविशिष्टबेणुबोधक-कीचकपदे दृष्टत्वात्, घातपदमभावमात्रपरं द्रष्टव्यम्।"**[६४] इति। विशिष्टवाचकानां पदानां पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम् इति न्यायात्

६२. तत्रैव, पृ-6
६३. तत्रैव, पृ-10
६४. तत्रैव, पृ10 – 14

उत्पत्तिविशिष्टाभाववाचकस्य विशिष्टवाचकस्य घातपदस्य उत्पत्त्यर्थके विपदे सति अभावरूपविशेष्यमात्रपरत्वम्। अत्र कालिदासशिष्टप्रयोगा हि प्रमाणम्। तथाहि स कीचकैर्मारुतपूर्णरन्ध्रैः ... इत्यत्र कीचकपदार्थो हि मारुतपूर्णरन्ध्रत्वविशिष्टवेणुरिति। तथाहि आमरी गीः – ***कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः*** इति। ननु कीचकपदप्रयोगेणैव मारुतपूर्णरन्ध्रत्वविशिष्टबोधनाद् मारुतपूर्णरन्ध्रत्वविशेषणम-नर्थकम् इति चेदत्र विशिष्टवाचकानां पदानां पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम् इति न्यायात् पृथग् विशेषणवाचकपदप्रयोगात् विशेष्यवाचकस्य कीचकपदस्य वेणुरूपविशेष्यमात्रबोधकत्वम्। तथाहि दिनकरीये – **"स कीचकैर्मारुतपूर्णरन्ध्रैः... इत्यत्र कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः इति कोशपर्यालोचनया मारुतपूर्णरन्ध्रत्वविशिष्टवेणुबोधककीचकतपदे दृष्टत्वात्, घातपदमभावमात्रपरं द्रष्टव्यम्।"**[६५] इति।

मञ्जूषकृता महादेवकृतसंशीतिस्तच्छित्तिश्च भूयसा तिरस्कृता। तथाहि उपसर्गा हि द्योतका न तु वाचका इति न्यायनयः। तथाहि जागदीशी गीः – **"प्रादयस्तूपसर्गा न सार्थकाः"**[६६] इति। वीत्यपुसर्गस्य द्योतकत्वेन शक्तत्वाभावान्न पदत्वमिति पदत्वमाश्रित्य **विपदमनर्थकम्** इत्याक्षेपस्तथा **विपदं सार्थकमिति** समाधिर्निर्युक्तिकः। न चाक्षेपसमाधी उपसर्गाणां वाचकत्वपक्षमाश्रित्यात्रेति वाच्यम् स्वसम्प्रदायसिद्धान्तविरुद्धत्वात्। तथाहि मञ्जूषाकृतागादि – **"अथैवमपि विपद-मित्ययुक्तम् उपसर्गाणां द्योतकत्वेन शक्तत्वरूपपदत्वासम्भवात्। ... केचित् उपसर्गाणां वाचकत्वपक्षमवलम्ब्येदमुक्तं महादेवेनेति समादधते।**

---

[६५]. तत्रैव, पृ- 12-14

[६६]. श.श.प्र. सम्पा. ढुण्ढीराजशास्त्री, पृ. 56

**स्वपरमतभेदपरिज्ञानविधुरो महादेव इत्यभिधानस्यैव पर्यायान्तरमिदं समाधानं, द्योतकत्वनैयायिकमते विशब्दद्योत्यार्थस्याव्यावर्तकत्व-परिहाराभावश्च।"**[६७] इति। न च **वा गतिबन्धनयोः** इति वाधातोः औणादिकेन इत्प्रत्ययेन निष्पन्नो विशब्दः लक्षणया उत्पत्त्यर्थक इत्यपि वाच्यं, गत्यर्थकधातोः उत्पत्त्यर्थकत्वस्य विरुद्धत्वात्।

ननु कस्तर्हि समाधिराक्षेपस्येत्येवं विविधयुक्तिजालनिगूढः अयं विषयः। मञ्जूषाकृन्नये विशब्दो हि विशेषार्थद्योतकः। न चोत्पत्तिर्विशब्दार्थः, तस्य घातपदेनैवोपस्थितत्वात्। ननु विघ्नध्वंसे को नाम विशेष इति चेत्तैस्तैश्चत्वारस्तत्र पक्षाः प्रपञ्चिताः। तथाहि –

**प्रथमकल्पः** – विघ्नविघातायेत्यत्र विघातपदस्थविशब्दार्थो विशेषो हि अविलम्बितोत्पत्तिकत्वम् इति प्रथमः पक्षः। यद्यपि जन्यभावमात्रस्य विनाशित्वनियमात् कृताभ्यागमभोगादिना अस्मिन् अमुष्मिन् वा जन्मनि जन्यविघ्नस्यापि नाशस्तथापि न तादृशनाशकान्तरप्रयुक्तदूरितक्षयो समाप्तिसाधकः। परं मङ्गलद्वारा अविलम्बेनैवोत्पन्न-विघ्ननाशात् समाप्तिर्ध्रुवा इत्यविलम्बवाची विशब्दः। तथाहि पट्टाभिरामवाणी – "**अथैवं विघ्नघातायेतत्यत्र विशब्दस्य किं प्रयोजनमिति चेद्विघ्नप्रतियोगिकध्वंसे विशेषद्योतनमेवेति ब्रूमः। स च विशेषो नोत्पत्तिरूपः घातपदेनैव तल्लाभात्, घातपदस्या-खण्डोपाधिरूपध्वंसत्वविशिष्टवाचितास्वीकारे तत्रोत्पत्तिरूपविशेषस्य अव्यावर्त्तकत्वात्। किन्तु अविलम्बितोत्पत्तिकत्वं विशेषः तथाहि**

[६७] . का.व., सम्पा. श्रीशङ्करशास्त्री, पृ-11

**जन्यभावस्य विनाशित्वनियमात् उत्पन्नो विघ्नो यद्यपि भोगादिरूपेण नाशकान्तरेणावश्यमेव अस्मिन्नमुष्मिन् वा जन्मनि नङ्क्ष्यति तथापि तादृशो विघ्ननाशो न कार्यकारीति समाप्तिप्रतिबन्धापत्तेः। मङ्गले कृते तु इदानीमेव विघ्नो नश्यतीत्यविलम्बेन विघ्ननाशाय मङ्गलाचरणमिति स एष मुख्यः कल्पः।"**[६८] इति।

**द्वितीयकल्पः** – भोगाद्यजन्यत्वरूपविशेषद्योतको हि विशब्द इत द्वितीयः पक्षः। विघ्नध्वंसविशेषे मङ्गलं कारणमिति नियमाद्भोगादिना अजन्यस्य विघ्नध्वंसस्य विघातकं हि मङ्गलमिति सूचयति विघातपदस्थो विशब्दः। तथाहि मञ्जूषायां – एवमन्ये अपि कल्पाः कविभिरुद्भाविताः। यदा मङ्गलस्य न विघ्नध्वंसत्वं कार्यतावच्छेदकं, भोगादिजन्यविघ्नध्वंसे व्यभिचारात्। किन्तु भोगाद्यजन्यविघ्नध्वंसत्वं, स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन मङ्गल-विशिष्टविघ्नध्वंसत्वं वा, अत एव वक्ष्यति मङ्गलं विघ्नध्वंसविशेषे कारणमिति। ततश्च भोगाद्यजन्यत्वरूपविशेषद्योतको विशब्द इति द्वितीयः कल्पः।

## <u>तृतीयं समीक्षणम् -</u>

साक्षान्न्यायसिद्धान्तमुक्तावलीव्याख्यानपरा दिनकरी न्यायसिद्धान्त-मुक्तावल्याः **ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि**

---

६८. तत्रैव, पृ-17

**मङ्गलं नास्तिकादीनां ग्रन्थेषु निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न**[६९]**..** इत्यादिपङ्क्तिं व्याख्यातुकामादावेव भूमिमारचयति **ननु निष्फलत्वान्मङ्गलाचरणमयुक्तं, न च निष्फलत्वमेव तस्यासिद्धं, फलविशेषशून्यत्वेन हेतुना तत्साधनादित्यभि-प्रायेणाशङ्कते नन्वि**[७०]ति। तदाशयस्त्वयम् - फलविशेषशून्यत्वेन निष्फलत्वान्मङ्गला-चरणं निर्युक्तकमेव। तथाहि प्राचां नैयायिकानां मते मङ्गलाचरणस्य फलं समाप्तिस्तथा नव्यानां नये विघ्नध्वसः। तथा च न्यायसिद्धान्तमुक्तावल्यां विश्वनाथेन मङ्गलसफलत्वविषये मङ्गलं न विघ्नध्वंसं प्रति इत्युक्त्या नवीनमतं तथा मङ्गलं न समाप्तिं प्रति इत्युक्त्या प्राचीनमतं तिरस्कृतम्। तत्रानुमानप्रयोग एवं बोध्यः – मङ्गलम् अयुक्तम्, निष्फलत्वात्, जलताडनादिवत् इति। न च निष्फलत्वरहेतुरसिद्ध इति वाच्यम्, तस्यानुमानसिद्धत्वात्। तत्र चेदमनुमानं – मङ्गलं निष्फलम् फलविशेषशून्यत्वात् इति। एवं हि यद्धि यावत्फलविशेषशून्यं तद्धि निष्फलम् इति मङ्गलस्य यावत्फलविशेषशून्यत्वेन निष्फलत्वादाचरणं निर्युक्तिकम् इति पूर्वपक्षिपक्षप्रकाशनाय हि न्यायसिद्धान्तमुक्तावल्यां विश्वनाथेन न्यगादि – ननु न मङ्गलमित्यादीति दिनकरीकृदाशयः।

परं प्रभाकृन्न दिरकरीकारमतं सहते। अर्थात् फलविशेषशून्यत्वेन निष्फलत्वान्मङ्गलाचरणं निर्युक्तिकमिति पूर्वपक्षप्रकाशनार्थं न्यायसिद्धान्त-मुक्तावल्यां **ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्**[७१] इति

---

[६९] . न्या. मु., सम्पा. श्रीकृष्णवल्लभाचार्य, पृ - 8
[७०] . का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ- 14-15
[७१] का. व. सम्पा. पञ्चाननशास्त्री, पृ. - 4

विश्वनाथोक्तिरिति दिनकरीनयं न गृह्यते प्रभाकृता। तथाहि प्रभाकन्नयः – **केचित्तु ननु निष्फलत्वान्मङ्गलाचरणमयुक्तं, न च निष्फलत्वमेवासिद्धं फलविशेष-शुन्यत्वहेतुना तत्साधनादित्यभिप्रायेण शङ्कते नन्वित्यवतरणिकामाहुः। तदसत्, नवीनमते विघ्नध्वसंस्यैव मङ्गलफलत्वेन, प्राचीनमते समाप्तेरेव तत्फलत्वेन, उभयोः फलत्वस्य कस्याप्यननुमतत्वेन तयोः फलविशेषत्वासम्भवात्। अस्तु वा फलविशेषशब्देन लक्षणया उभयोरुपस्थितिः, तथापि फलविशेषशून्यत्वस्य विघ्नध्वंसजनकत्वाभाव-समाप्तिजनकत्वाभावोभयरूपस्य निष्फलत्वरूप-साध्यशून्ययागादौ सत्त्वेन व्यभिचारितया तादृशोभयत्वावच्छिन्नेन हेतुना निष्फलत्वसाधना-सम्भवादिति।**[७२] इति। प्रभाकरनये प्राचीनानां नये मङ्गलस्य फलं समाप्तिः तथार्वाचीनानां नये विघ्नध्वंसः। परं कस्यापि एकस्य मतानुसारं समाप्तिविघ्नध्वंसौ न फलविशेषौ। तेन ताभ्यां न मङ्गलस्य निर्युक्तिकत्वं साधयितुं शक्यते, अत्र फलविशेषशून्यत्वेन मङ्गलस्यासिद्धत्वमिति नियमाप्रवृत्तेः। यदि फलविशेषपदेनात्र लक्षणया समाप्तिविघ्नध्वंसयोरुभयोः बोध्यते तदापि फलविशेषशून्यत्वहेतुना न मङ्गलनिष्फलत्वसिद्धिर्व्यभिचारात्। तथाहि **मङ्गलं निष्फलं फलविशेषशून्यत्वात्** इत्यनुमितौ साध्याभाववति स्वर्गादिफलके निष्फलत्वाभाववति यागादौ समाप्तिविघ्नध्वंसरूपफलविशेषशून्यत्वसत्त्वाद् साध्याभाववद्वृत्तित्वरूपव्यभिचारः। इत्थं साधारणसव्यभिचाररूपहेत्वाभाससत्त्वात् मङ्गलं निष्फलं फलविशेषशून्यत्वात् इत्यनुमानं सदोषम्। तेन च अनुमानेनानेन न

[७२]. का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ- 21-22

मङ्गलनिषफलत्वसिद्धिः। अतः दिनकरीकृता यदुक्तं मङ्गलं निष्फलं फलविशेषशून्यत्वात् इत्यनुमानानेनानेन पूर्वपक्षिसम्मतमङ्गलनिष्फलत्व-प्रख्यापनार्थं नन्वित्यादि न्यगादि विश्वनाथेन तदसदुक्तानुमानस्य दुष्टत्वेन तदसिद्धेः। तेन प्रभाकारनये **ननु न मङ्गलमि**त्यादिमूलस्य भूमित्वेन न च निष्फलत्वान्मङ्गलमयुक्तमित्यादिमहादेवभट्टोक्तिरसङ्गता।

**अत्रेदं विचार्यते यद्** महादेवेन फलविशेषशून्यत्वपदेन यावत्फल-विशेषाभावो बोधितः। तेन न कश्चन व्यभिचारः। न च मूलकृता मङ्गलस्य फलत्वेन समाप्तिविघ्नध्वंसयोरुल्लेखात् न तदितरयावत्फलविशेषाभावो मङ्गले सिद्ध इति वाच्यम्, समाप्तिविघ्नध्वंसातिरिक्तपशुपुत्रादिफलशून्यत्वस्य मङ्गले सर्वसम्मतत्वात्। किञ्च, मङ्गले समाप्तिविघ्नध्वंसातिरिक्तफलाभावसाधन एव ग्रन्थस्य सिद्धसाधनत्वात् दुष्टत्वापत्तिरापतेत्। अतः समाप्तिविघ्नध्वंसरूपफलशून्यत्वसाधनेन यावत्फलविशेष-शून्यत्वसिद्धिर्निश्चिता। तेन च स्वर्गादिफलके निष्फलत्व-रूपसाध्याभाववति यागे समाप्तिविघ्नध्वंसयोरभावे अपि तदतिरिक्तस्वर्गादिफलसत्त्वे यावत्फलविशेषशून्यत्व-रूपहेतोरसत्त्वान्न व्यभिचार इति मङ्गलं निष्फलं फलविशेषशून्यत्वादित्यनुमानस्य निर्दुष्टत्वं सिद्धम्। तथा च ननु न च मङ्गलमित्यादि मूलस्य भूमिरूपेण दिनकरीकृता यदुक्तं यत् मङ्गलं निष्फलं फलविशेषशून्यत्वात् इत्यनुमानानेनानेन पूर्वपक्षिसम्मतमङ्गलनिष्फलत्व-प्रख्यापनार्थं नन्वित्यादि न्यगादि विश्वनाथेन इति तद्धि निर्दुष्टमिति सिद्धम्।

# न्यायसिद्धान्तमुक्तावल्या ईश्वरवादे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्

नव्यनैयायिकेन विश्वनाथेन नूतनेत्यादिना मङ्गलेन श्रीकृष्णनमस्कारो व्यधायि। न्यायसिद्धान्तमुक्तावल्यां चेश्वरोद्देश्यकमङ्गलसफलत्वं निरूप्य ईश्वरसत्त्वं साधितम् संसारमहीरुहस्य बीजाय इत्यादिना। तत्र चेदमनुमानं दर्शितं – क्षत्यङ्कुरादिकं सकर्तृकं कार्यत्वात्, घटादिवत्। इति। तथा च न्यायसिद्धान्तमुक्तावल्यामुक्तम् – **संसारेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय, निमित्तकारणायेत्यर्थः। एतेन ईश्वरे प्रमाणमपि दर्शितं भवति, -तथाहि यथा घटादिकार्यं कर्तृजन्यं क्षित्यङ्कुरादिकमपि।**[७३] इति। विश्वनाथेन क्षित्यङ्कुरादिकार्यमित्याद्यनुमितेर्हेतौ सत्प्रतिपक्षहेत्वाभासमाशङ्क्य तन्निराकृतिः कृता। तथाहि – **न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्। अप्रयोजकत्वात्।**[७४] इति।

दिनकरीकृन्नये मौलं क्षित्यङ्कुरादिकम् सकर्तृकम् कार्यत्वाद् इत्यनुमानं प्रति पूर्वपक्षिणोपस्थापिते क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात्, आकाशादिवत् इत्यनुमाने सत्प्रतिपक्षदोषदर्शनं हि उपलक्षणमात्रम्। ननु किं नाम उपलक्षणम् – इति चेदुच्यते स्वबोधकत्वे सति स्वेतरबोधकत्वम् उपलक्षणत्वम् इति। यद्धि स्वबोधकं सद् स्वेतरबोधकं तद्धि उपलक्षणम्। तथा च प्रत्यनुमाने अनुकूलतर्काभावरूपदोषकथनं व्याप्यत्वासिद्धिरूपदोषान्तरस्य अजहल्लक्षणया

[७३]. न्या. मु., सम्पा. श्रीकृष्णवल्लभाचार्य, पृ -16
[७४] . तत्रैव, पृ- 21

कथनम्। तथाहि दिनकर्यां महादेवेन निरुक्तम् – **अप्रयोजकत्वादिति। अनुकूलतर्काभावादिति भावः। इदमुपलक्षणम्। शरीराजन्यत्वहेतौ शरीररूपविशेषणस्य असिद्धवारकस्यापि व्यभिचारावारकत्वेन व्यर्थतया, तद्विशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्याप्यत्वासिद्धेश्च इत्यपि द्रष्टव्यम्। न च व्यर्थविशेषणत्वस्याधिकोक्त्या निग्रहस्थानत्वे अपि तज्ज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वे मानाभावः इति वाच्यम्। तथापि गुरुधर्मस्य अनवच्छेदकतया साध्यसंबन्धितावच्छेदकधर्मवत्त्वरूपव्याप्तेः तत्र अभावेन व्याप्यत्वासिद्धेः दुर्वारत्वात् इति। तदुक्तम् आचार्यैः – एकामसिद्धिं परिहरतो द्वितीयापत्तिः।**[७५] इति। ननु क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीरजन्यत्वात्, आकाशादिवत् इत्यनुमाने कथं व्याप्यत्वासिद्धिदोष इति चेदुच्यते – दिनकरीकारनये अनुमाने अस्मिन् कर्त्रजन्यत्वसाध्यसाधनार्थं अजन्यत्वहेतुना प्रयोजनम्, शरीरपदेनालम्। तथा च, नियमत एव यद्धि अजन्यं तद्धि कर्त्रजन्यं भवतीत्यजन्यत्वहेतुनैव कर्त्रजन्यत्वसाधनं शक्यमिति हेतुघटकीभूतं शरीरपदं व्यर्थम्। व्यर्थविशेषणघटितत्वाच्छरीराजन्यत्वहेतुर्व्याप्यत्वासिद्धि-हेत्वाभासदुष्ट साध्यं साधयितुम् नालम्। ननूक्तहेतौ शरीरविशेषणानुपादाने अजन्यत्वमात्रस्य हेतोः पक्षासत्त्वेन स्वरूपासिद्धिरिति तद्वारणार्थं हेतौ शरीरपदोपादानादव्यर्थो हेतुरिति चेन्न, हेतुघटकदलानां व्यभिचारवारकतयैव सार्थक्यमिति नियमात् असिद्धिवारकस्यापि शरीररूपविशेषणस्य व्यभिचारवारकत्वेनाव्यर्थ्यत्वात्। तथा च, व्यर्थविशेषणावच्छिन्ने हेतौ साध्यव्याप्तिज्ञानासम्भवाद्धेतौ व्याप्यत्वासिद्धिर्दोषः।

[७५]. का.व., सम्पा. श्रीशङ्करशास्त्री, पृ- 43-44

तथा च, अत्र शरीराजन्यत्वादिति हेतौ शरीररूपव्यर्थविशेषणसत्त्वाद् अधिकाख्यनिग्रहस्थानम्। अधिकनिग्रहस्थानविषये उक्तम् – **विवक्षितात्किञ्चिदधिकमधिकम्।**[७६] इति। ननु शरीररूपव्यर्थविशेषणविशिष्टहेतूपदानादधिकनिग्रहस्थाने सत्यपि न कथमपि व्यर्थविशेषणविशिष्टहेतोर्हेत्वाभासत्वमनुमितिपरामर्शान्यतरप्रतिबन्धक-यथार्थज्ञानविषयस्यैव हेत्वाभासत्वात्तस्यानुमितिपरामर्शान्यतरप्रतिबन्धकयथार्थज्ञाना-विषयत्वाच्च। अस्य समाधानरूपेण सिद्धान्ती गदति यत् व्याप्तिविघटकत्वेनैव व्याप्यत्वासिद्धिर्जायते। तत्त्वचिन्तामणिकृता व्याप्तेर्लक्षणानन्तरमुक्तम् – साध्यसम्बन्धिता-वच्छेदकरूपववत्त्वं व्याप्तिः। साध्यसामानाधिकरण्यावच्छेदकं यद् हेतुतावच्छेदकं तद्वत्त्वं व्याप्तिरिति तदर्थः। साध्यसामानाधिकरण्यं च साध्याधिकरणवृत्तित्वम्। साध्याधिकरणवृत्तितावच्छेदकहेतुतावच्छेदकवत्त्वं व्याप्तिरिति फलति। वह्न्यधिरकणवृत्तितावच्छेदक यद् हेतुतावच्छेदकं धूमत्वम् धूमत्वविशिष्टस्य वह्न्यधिकरणवृत्तित्वात् तादृशधूमत्ववत्त्वं धूमे अस्तीति लक्षणसमन्वयः। व्यर्थविशेषणघटितं हेतुतावच्छेदकं कदापि साध्यसम्बन्धितावच्छेदकं न स्यात्, यतो हि असति बाधके गुरुधर्मापेक्षया लघुधर्मस्यैवावच्छेदकत्वाङ्गीकारात्। यथा हि नीलधूमो नास्तीत्यभावस्य प्रतियोगितावच्छेदकं न गुरुभूतं नीलधूमत्वम् , अपि तु लघुभूतं धूमत्वमेव। प्रकृते स्थले च शरीराजन्यत्वापेक्षया अजन्यत्वस्य हि लघुत्वात्साध्यसम्बन्धितावच्छेदकत्वं, न तु गुरुभूतस्य शरीराजन्यत्वस्य। तेन च, गुरुधर्मसमनियतस्य लघुधर्मस्य अवच्छेदके सम्भवति, गुरुधर्मस्य नावच्छेदकत्वमिति

---

[७६] त.भा. सम्पा. गङ्गाधरकरन्यायाचार्य्य, पृ.- 603

नियमात्, धूमत्वापेक्षया गुरुभूतस्य धूमत्वापेक्षया गुरुभूतस्य धूमत्वसमनियतस्य नीलत्वविशिष्टधूमत्वस्य साध्याधिकरणवृत्तितावच्छेदकत्वविरहेण साध्याधिकरण-वृत्तितावच्छेदकहेतुतावच्छेदकवत्त्वरूपव्याप्त्यभावाद्व्याप्यत्वासिद्धिः। एवं जन्यत्वाभावत्वापेक्षया शरीरजन्यत्वाभावत्वस्य गुरुत्वेन साध्याधिकरण-वृत्तितावच्छेदकत्वं नास्तीति शरीराजन्यत्वरूपहेतौ व्याप्यत्वासिद्धिरिति दिनकरीकृतामाशयः। अर्थात् ईश्वरास्तित्वसाधाकम् क्षित्याङ्कुरादिकं सकर्तृकं कार्यत्वाद्, घटवदित्यनुमानं प्रति पूर्वपक्षिभिरुपस्थापिते क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वाद्. आकाशादिवद् इत्यनुमाने प्रयुक्तः शरीराजन्यत्वहेतुर्यथा सत्प्रतिपक्षहेत्वाभासस्तथा शरीररूपव्यर्थविशेषणविशिष्टत्वात् व्याप्यत्वासिद्ध इति।

परमेतत्सर्वं प्रभाकारो नैतत्सहते। तन्नये न व्यर्थविशेषण-विशिष्टत्वाच्छरीराजन्यत्वहेतुर्व्याप्यत्वासिद्धः। तथाहि प्रभाकारनये गुरुधर्मत्वमात्रं व्याप्यतानवच्छेदकमिति नियमाभावात् गुरुधर्मस्यापि शरीराजन्यत्वस्य व्याप्यता-वच्छेदकत्वेन व्याप्यत्वासिद्ध्यभावः। न च लघुधर्मसमनियतत्वविशिष्टगुरुधर्मत्वस्या-वच्छेदकत्वनियमात् शरीराजन्यत्वस्य व्याप्यतानवच्छेदकत्वापत्तिरिति वाच्यं, शरीराजन्यत्वस्य गुरुधर्मत्वे अपि लघुधर्मसमनियतत्वाभावेन व्याप्यतावच्छेदकत्व-सम्भवात्। किञ्च, एकामसिद्धिं परिहरतो द्वितीयापत्तिः इत्यस्य व्याख्या या कृता दिनकरीकृता साप्ययुक्ता। अस्याः पङ्क्तेर्व्याख्या त्वेवं बोध्यम् – एकाम् असिद्धिं स्वरूपासिद्धिं परिहरतः शरीररूपविशेषणोपदानेन द्वितीयापत्तिः अर्थात् अधिकरूपनिग्रहस्थानरूप-द्वितीयापत्तिः इति। अतो प्रभाकृन्नये मौलं क्षित्यङ्कुरादिकम् सकर्तृकम्

क्षित्यङ्कुरादिकम् इत्यनुमानं प्रति पूर्वपक्षिणोपस्थापिते क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात्, आकाशादिवत् इत्यनुमाने सत्प्रतिपक्षदोषे सत्यपि शरीराजन्यत्वादिति हेतौ शरीररूपव्यर्थविशेषणोपादानेन अधिकनामकनिग्रहस्थान-प्रसङ्गः, न तु व्याप्यत्वासिद्धिः इति। तथाहि तदुक्तिः -

**"केचित्तु इदमुपलक्षणम्। शरीराजन्यत्वहेतौ शरीररूपविशेषणस्य असिद्धवारकस्यापि व्यभिचारावारकत्वेन व्यर्थतया, तद्विशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्याप्यत्वासिद्धेश्च इत्यपि द्रष्टव्यम्।**

**न च व्यर्थविशेषणत्वस्याधिकोक्त्या निग्रहस्थानत्वे अपि तज्ज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वे मानाभावः इति वाच्यम्। तथापि गुरुधर्मस्य अनवच्छेदकतया साध्यसंबन्धितावच्छेदकधर्मवत्त्वरूपव्याप्तेः तत्र अभावेन व्याप्यत्वासिद्धेः दुर्वारत्वात् इति। तदुक्तम् आचार्यैः – एकामसिद्धिं परिहरतो द्वितीयापत्तिः इति दूषणान्तरमाहुः। तदसत् गुरुधर्मत्वात्रं व्याप्यतानवच्छेदकत्वे न तन्त्रं, धूमप्रागभावत्वस्यापि व्याप्यता-नवच्छेदकत्वापत्तेः। किन्तु लघुधर्मसमनियतत्वविशिष्टगुरुधर्मत्वं, एवञ्च, शरीराजन्यत्वस्य गुरुधर्मत्वे अपि लघुधर्मसमनियतत्वाभावेन व्याप्यतावच्छेदकत्वसम्भवात्। उक्तार्थ आचार्योक्तिरपि नोपष्टम्भिका, द्वितीयापत्तिरित्यस्य द्वितीयायाः व्याप्यत्वासिद्धेरापत्तिरिति नार्थः। परिहरत इत्यस्यानन्वयापत्तेः। किन्तु एकां हेतुनिष्ठासिद्धिं परिहरतः विशेषणान्तरदानेन निवारणकर्तुः पुंसः द्वितीयाया निग्रहस्थानरूपाया अधिकोक्तेरापत्तिरित्यर्थः।**

**तादृशाचार्योक्त्या हेतोः स्वरूपासिद्धिवारणाय विशेषणदाने तद्दातुरधिकोक्तिरूपदोषप्राप्तिरित्याचार्याणामाशयो लभ्यत इति तदुक्ते-रुपष्टम्भकत्वासम्भवाच्च।** ”[७७] इति।

## न्यायसिद्धान्तमुक्तावल्याः पदार्थोद्देशवादे दिनकरी-प्रभा-मञ्जुषाटीकानां समीक्षात्मकमध्ययनम्

विश्वनाथेन कारिकावल्यां – **द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।**

**समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः॥**[७८] इति कारिकया पदार्थानामुद्देशः अकारि। एते सप्तपदार्था वैशेषिकशास्त्रेषु प्रसिद्धास्तथा न्यायशास्त्रे अपि स्वीकृताः। तथाहि मुक्तावल्यामगादि – **पदार्थान् विभजते द्रव्यं गुण इति। अत्र सप्तमस्य अभावत्वकथनादेव षण्णां भावत्वं प्राप्तम्, तेन पृथगुपन्यासो न कृतः। एते च पदार्था वैशेषिकप्रसिद्धाः, नैयायिकानामप्यविरुद्धः। प्रतिपादितं चैवमेव भाष्ये। अत एव चिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्ययोः अतिरिक्तपदार्थत्वम् आशङ्कितम्।**[७९] इति। नन्वन्यैः शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वेनाङ्गीकारात्कथमत्र सप्त पदार्था इत्युच्यते इति जिज्ञासाशमनाय मुक्तावल्यां विश्वनाथेन शक्तिसादृश्यादीनां पूर्वपक्षिपक्षानुसारं प्रतिपाद्य अतिरिक्तपदार्थत्वं खण्डितम्। शक्ति-

---

[७७] . का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ- 44

[७८] . न्या.सि. मु., सम्पा. श्रीकृष्णवल्लभाचार्य, पृ- 23

[७९] . न्या.सि. मु., सम्पा. श्रीकृष्णवल्लभाचार्य, पृ-24-26

सादृश्यादीनामतिक्तपदार्थत्वं खण्डयता तेनागादि – **ननु कथमेते एव पदार्थाः, शक्तिसादृश्ययोरपि अतिरिक्तपदार्थत्वात्। तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते।**[८०] इत्यादि। मौलमिदं वाक्यं व्याख्यातुकामेन दिनकरीकारेण भूमिराचयितुमुक्तम् – "**मण्यादिसमवधाने सति वह्निना दाहोत्पत्तिवारणाय मण्यादेः कारणविघचकत्वरूपा प्रतिबन्धकता वाच्या। सा च वह्निनिष्ठदाहानुकूलश्कतिरूपकारणविघटकतयैव निर्वहति। मण्यादिप्रतिबन्धक-त्वान्यथानुपपत्त्या सिद्धायाः शक्तेः षड्भावेषु अनन्तर्भूतत्वात् अतिरिक्तत्वमिति पदार्थाः सप्त कीर्तिताः इति मूलमयुक्तमित्यभिप्रायेण प्राभाकरः शङ्कते नन्विति। अतिरिक्तइति। सप्तपदार्थातिरिक्तेत्यर्थः।**"[८१] इति। तदाशयस्त्वित्थम् – वह्निः दाहं प्रति कारणम्। परं चन्द्रकान्तमणिविशिष्टो वह्निः दाहं नोत्पादयितुं शक्नोति चन्द्रकान्तमणेः दाहं प्रति प्रतिबन्धकत्वात्। मणेः प्रतिबन्धकत्वं नाम वह्निनिष्ठदाहानुकूलशक्तिनाशकत्वम्। वह्नौ दाहानुकूलशक्तेरभावे तन्नाशकत्वरूपं प्रतिबन्धकत्वं मणेः नोपपद्यते इति वह्नौ दाहानुकूला शक्तिः स्वीकर्तव्या। सा च शक्तिः षट्सु भावेषु नान्तर्गच्छतीत्यतिरिक्तपदार्थत्वेन स्वीकरणीया। तेन पदार्थाः सप्त कीर्तिताः इति मूलमयुक्तमिति प्राभाकरमतमाश्रित्य विश्वनाथः शङ्कते ननु कथमेत एवेत्यादिनेति।

प्रभाकारस्तूक्तव्याख्यानं महादेवस्य न स्वीकरोति। तन्नये मौल आक्षेपस्तु शक्तिसादृश्ययोरतिरिक्तपदार्थत्वेन। परं शक्तेरतिरिक्तपदार्थत्वस्य प्रभाकर-मीमांसकसम्मतत्वे अपि सादृश्यस्यातिरिक्तपदार्थत्वस्य तदसम्मतत्वादालङ्कारिक-

---

[८०]. भा.प., सम्पा. पञ्चाननभट्टाचार्य, पृ-19-20
[८१]. का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ-54

सम्मतत्वाच्च भ्रमात् प्राभाकरश्शङ्कते इत्युक्त्वा मौलाक्षेपस्य भूमी रचिता दिनकरीकृतेति दुष्टं महादेवव्याख्यानम्। तथाहि उक्तम् प्रभाकृता – **केचित्तु मण्यादिसमवहिते सति वह्निना दाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपप्रतिबन्धकता वाच्या, सा च वह्निनिष्ठदाहानुकूल-शक्तिरूपकारणविघटकतयैव निर्वहतीति मण्यादिप्रतिबन्धकत्वान्यथा-नुपपत्त्या सिद्धायाशक्तेः षड्भावानन्तर्भूतत्वादतिरिक्तत्वमिति पदार्थाः सप्त कीर्तिता इति मूलमयुक्तमित्यभिप्रायेण प्राभाकरश्शङ्कते नन्विती-त्यवतरणिकामाहुः। तदसत्, तन्मते शक्तेरतिरिक्तपदार्थत्वे अपि सादृश्यस्यातिरिक्तपदार्थत्वाभावात्। उभयोरतिरिक्तपदार्थत्वव्यवस्थापक-नन्वित्यदाग्रन्थस्य प्राभाकराभिप्रायकत्वासम्भवात्।**[८२] इति।

<u>**अत्रेदं विचार्यते**</u> यत् मीमांसकदर्शने भट्टैः कुमारिलैः पञ्च पदार्था अङ्गीकृताः। ते हि – द्रव्यं, गुणः, कर्म, अभावः, सामान्यञ्च। परं प्राभाकरैः द्रव्य, गुणः, कर्म, सामान्यं, समवायः, सादृश्यं, शक्तिः इत्येते अष्टौ पदार्थाः स्वीकृताः। प्राभाकरसम्प्रदायानुसारं ग्रथितायां प्रकरणपञ्चिकायां व्याख्यातेषु प्राभाकरसम्मतपदार्थेषु अनन्यं हि सादृश्यम् । अतः सादृश्यं न केवलमालङ्कारिकैः प्राभाकरैरप्यङ्गीकृतमिति तन्मतमाशङ्क्य पूर्वपक्षमतोपस्थापनं ग्रन्थकर्तुरिति व्याख्यानं दिनकरीकृतो युक्तमेवेति मे मतिः।

---

[८२] . तत्रैव, पृ-54

## न्यायसिद्धान्तमुक्तावल्याः सादृश्यस्यातिरिक्तपदार्थत्वानुमाने दिनकरीप्रभामञ्जुषाणां समीक्षात्मकमध्ययनम्

प्राभाकरमतानुसारं पूर्वपक्षरूपेण सादृश्यस्य पदार्थान्तत्वमुपस्थाप्य तन्निराकृतिः कृता विश्वनाथेन मुक्तावल्याम्। तत्र सादृश्यस्य तदैव पदार्थान्तरत्वं यदि नैयायिकसम्मतसप्तपदार्थानन्तर्भूतत्वमिति ग्रन्थकृता षड्भावानन्तर्भूक्तत्वं सादृश्यस्य प्रख्यापनार्थमुक्तम् – "**एवं सादृश्यमप्यतिरिक्तपदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति सामान्ये अपि सत्त्वात्, यथा गोत्वं नित्यं तथा अश्वत्वमपि नित्यमिति सादृश्यप्रतीतेः।**"[८३] इति।

मूलवाक्यमिदं विश्वनाथस्य व्याख्यातुकामेन महादेवेन दिनकर्यामुक्तम् – "**तद्धीति। तत् सादृश्यम्, हि हेतौ। सामान्ये अपीति। सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादित्यर्थः। तेन सामान्यत्वे न व्यभिचारः। व्यतिरेकित्वे सतीति विशेषणान्न प्रमेयत्वादौ व्यभिचारः।**"[८४] इति।

दिनकरीकारनये यस्मात् सादृश्यं षड्भावानन्तर्भूतं तथाभावानन्तर्भूतं च तस्मात् सादृश्यमतिरिक्तः पदार्थः तत्रानुमानं हि सादृश्यं क्लृप्तसप्तपदार्थातिरिक्तम्, षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वात् इति। उक्तानुमानस्थहेतुघटकीभूतस्य सत्यन्तभागस्य पक्षे सादृश्ये असिद्धिवारकम् अनुमानं हि सादृश्यं षड्भावानन्तर्भूतम् सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्, गगनाभाववदिति। अस्य अनुमानस्य हेतौ

[८३] . **भा.प., सम्पा. पञ्चाननभट्टाचार्य, पृ-22-23**

[८४] . का.व., सम्पा. शङ्करामशास्त्री, पृ- 58-59

यदि सामान्येतरवृत्तित्वे सतीति भागस्यानुपदानात्सामान्यत्वे व्यभिचारः। सामान्यवृत्तित्वमात्रोक्तौ द्रव्यत्वादौ व्यभिचारः। अतो विशिष्टहेतुनैव सादृश्ये षड्भावातिरिक्तत्वं साध्यम्। ननु सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादिति विशिष्टहेतोः साध्याभाववति प्रमेयत्वे सत्त्वाद्व्यभिचारापत्तिः। अतो हेत्वंशे व्यतिरेकित्वे सति इति विशेषणं योज्यमिति महादेवाभिप्रायः। व्यतिरेकित्वं ह्यत्यन्ताभावप्रतियोगित्वम्। तच्च प्रमेयत्वे नास्ति, प्रमेयत्वस्य केवलान्वयित्वेन अत्यन्ताभावाप्रतियोगित्वादिति भावः।

नृसिंहशास्त्रिणा नाङ्गीक्रियते दिनकरीमतम्। तन्नये सादृश्यं षड्भावानन्तर्भूतम् सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्, गगनाभाववदित्यनुमाने सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादिति हेतुर्न व्यभिचारदोषदुष्टः। तथाहि प्रमेयं हि प्रमाविषयः। तथा च प्रमेयत्वस्य प्रमाविषयत्वस्वरूपस्य विषयभेदात् भिन्नत्वाद् एकस्मिन् प्रमेयत्वे सामान्येतरवृत्तित्वसामान्यवृत्तित्वोभयवत्त्वात्मकहेतोरभावात्। तथाहि उक्तम् – “ **केचित्तु प्रमेयत्वे व्यभिचारवारणाय हेतौ व्यतिरेकित्वे सतीति विशेषणं देयममित्याहुः। तदसत्, प्रमेयत्वस्य प्रमाविषयत्वरूपस्य विषयभेदेन भिन्नतया निरुक्तोभयवत्त्वरूपहेतोरभावात्।**”[८५] इति।

अन्यथापि दिनकरीमतचिखण्डिषया न्यगादि प्रभाकृता – “**यदि विषयतासम्बन्धेन प्रमावत्त्वमेव प्रमेयत्वं, विषयतासम्बन्धेन सर्वत्र विद्यमानाया ईश्वरप्रमाव्यक्तेः निरुक्तवृत्तिताद्वयवत्त्वेन व्यभिचारस्तदवस्थ**

---

[८५]. का.व., सम्पा. शङ्करामशास्त्री, पृ- 58

**इत्युच्यते तदा व्यतिरेकित्वविशेषणदाने अपि समवेतत्वस्य प्रतियोगितासम्बन्धेन समवायवत्त्वरूपस्य तादृशहेतुमत्त्वेन व्यभिचारस्य दुर्वारत्वात्। यदि च प्रतियोगितायाः वृत्त्यनियामकतया तेन सम्बन्धेन समवायवत्त्वरूप-समवेतत्वाप्रसिद्ध्या तत्र व्यभिचारस्याप्रसक्तिरित्युच्यते तदा विषयताया अपि वृत्त्यनियामकतया तेन सम्बन्धेन प्रमावत्त्वरूपप्रमेययत्वासिद्ध्या तत्र व्यभिचाराभावेन हेतौ व्यतिरेकित्वे सतीति विशेषणदानवैयर्थ्यस्य दुर्वारत्वात्।"**[८६] इति।

## न्यायसिद्धान्तमुक्तावल्या विशेषवादे दिनकरीप्रभामञ्जुषाणां समीक्षात्मकमध्ययनम्

**द्रव्यं गुण** इत्यादिकारिकयोक्तेषु सप्तपदार्थेषु पञ्चमपदार्थं विशेषं प्रतिपादयता विश्वनाथेन कीर्तितेयं कारिका – "**अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः।**"[८७] इति। अन्त्यो हि विशेषः। स च विशेषो नित्यद्रव्यवृत्तिर्भवति। अत्र कारिकायाम् अन्त्यपदं हि विशेषस्वरूपपरं, नित्यद्रव्यवृत्तिपदं तु विशेषस्थाननिर्देशपरम्। तथाहि दिनकर्यामुक्तम् – "**नित्यद्रव्यवृत्तिरिति विशेषाणां स्थानकथनं न तल्लक्षणे प्रविष्टं प्रयोजनाभात्।**"[८८] इति। मयूखटीकायामपि आटीकितम् – **ननु अन्त्यो**

---

[८६] . तत्रैव

[८७] . न्या.सि. मु., सम्पा. श्रीकृष्णवल्लभाचार्य, पृ - 50

[८८] . का.व., सम्पा. शङ्करामशास्त्री, पृ- 119

**नित्यद्रव्यवृत्तिरित्यनेन स्वतोव्यावृत्तत्वे सति नित्यवृत्तित्वं विशेषस्य लक्षणमवगम्यते तत्र नित्यवृत्तित्वदलनिवेशनं व्यर्थमिति चेत् न, नित्यवृत्तिरित्यस्य विशेषाणां स्थानकथनोपयोगित्वेन लक्षणकुक्षा-प्रवेशेनादोषात्।**[८९] इति। अन्ते अवसाने व्यावर्त्तकानामवसाने व्यावर्ततकान्तररहिते इति यावत्, भव इति अन्त्यः। कारिकार्थं प्रतिपादयता विश्वनाथेन मुक्तावल्यामुक्तम् – " **विशेषं निरूपयति – अन्त्य इति। अन्ते अवसाने वर्तत इत्यन्त्यः, यदपेक्षया विशेषो नास्तीत्यर्थः। घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात् परस्परं भेदः, परमाणूनां परस्परं भेदको विशेष एव। स तु स्वत एव व्यावृत्तः। तेन तत्र विशेषान्तरापेक्षा नास्तीत्यर्थः।"**[९०] इति। इत्थं विशेषस्य स्वतोव्यावृत्तत्वस्वरूपं प्रतिपादितं ग्रन्थकृता विश्वनाथेन।

विशेषस्य स्वतोव्यावृत्तत्वस्वरूपं परिष्कुर्वता महादेवेन दिनकर्यामुक्तम् – **"स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसजातीयेतर-भेदानुमित्यविषयत्वम्।"** [९१] इति। तदर्थश्च स्वभिन्नलिङ्गिका-स्वविशेष्यिका-स्वसजातीयेतरभेदविषयिणी या अनुमितिः तद्विषय तदुद्देश्यो य तद्भिन्नत्वमिति। स्वपदं हि पक्षत्वेनाभिमतम्। स्वभिन्नलिङ्गकत्वं स्वभिन्नलिङ्गजन्यत्वम् इति बोध्यम्। स्वभिन्नलिङ्गकस्वविशेष्यकस्वसजातीयेतरभेदानुमितिः हि अयं परमाणुः परमाण्वन्तरभिन्न एतद्विशेष्यात्। अस्मिन् अनुमाने स्वमत्र अयं परमाणुः इति। स्वभिन्नलिङ्गं हि एतत्परमाणुगतविशेषः। तज्जन्यत्वमनुमितेर्वर्तते। एवं हि

---

[८९] . का.व., सम्पा. श्रीरामगोविन्दशुक्ल, पृ -35
[९०] . भा.प., सम्पा. पञ्चाननभट्टाचार्य, पृ-121
[९१] का.व., सम्पा. शङ्करामशास्त्री, पृ-119

स्वविशेष्यकत्वमपि अनुमितेर्वर्तते। तेनेयमनुमितिर्हि एतत्परमाणुविशेष्यिकेति स्वविशेष्यकत्वं चानुमितेर्वर्तते। एवं स्वसजातीयम् एतत्परमाणुसजातीयं यदितरत्परमाण्वन्तरं तद्भेदविषयकत्वं चानुमितेर्वर्तते। तद्विषयः तदुद्देश्यः एतत्परमाणुः। तद्भिन्नत्वं विशेषे वर्तते। स्वपदेन विशेषस्य ग्रहणे सति तद्विशेष्यकस्वसजातीयेतरभेदानुमितिः अयं विशेषः विशेषान्तराद्भिन्नः इत्यनुमितिः । अस्यां चानमितौ स्वभिन्नलिङ्गकत्वं नास्तीति स्वपदेनात्र विशेषो न ग्राह्यः। विशेषाश्रयपदार्था अत्र स्वपदेन ग्राह्याः। तद्भिन्नत्वं विशेषेषु वर्तत इति स्वतोव्यावृत्तत्वस्य समन्वयः साध्यः। विशेष्यस्यापि स्वलिङ्गकस्वसजातीय-विशेषान्तरभेदविधेयकानुमित्युद्देश्यत्वात् तादृशानुमित्युद्देश्यभिन्नत्वविरहात् असम्भवस्य वारणाय अनुमितौ स्वभिन्नलिङ्गत्व-निवेशः। स्वभिन्नेत्यनुपादाने विशेषो विशेषान्तरभिन्नः विशेषादित्यनुमितिविषयत्वस्य विशेषे अपि सत्त्वादसम्भवः स्यात्। स्वविशेष्यकेत्यनुपादाने घटो विशेषाद् भिद्यते कपालसमवेतत्वादित्यनुमितिविषयत्वस्य विशेषे सत्त्वेनोक्तदोषतादवस्थ्यम्।

ननु स्वलिङ्गकस्वविशेष्यकस्वसजातीयेतरभेदानुमितिविषयत्वमेव स्वतोव्यावृत्तत्वं वाच्यं किं स्वलिङ्गकस्वविशेष्यकस्वसजातीयेतरभेदानुमित्य-विषयत्वकथनेनेति चेत, न, घटो घटान्तराद्भिन्नस्तादात्म्येन घटादित्यनुमिति-विषयत्वस्य घटे अपि सत्त्वेनाव्याप्त्यापत्तेः।

दिनकरीकारकृतं स्वतोव्यावृत्तत्वलक्षणं न स्वीकृतं प्रभाकृता। तन्नये स्वतोव्यावृत्तलक्षणे स्वविशेष्यकपदं निष्प्रयोजनकम्। अतस्तन्नये

निष्प्रयोजनकपदघटितत्वात् स्वतोव्यावृत्तत्वलक्षणम् अयुक्तम्। तथाहि प्रभाकृतागादि – **“केचित्तु स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गजन्यस्वविशेष्यक-स्वसजातीयेतर-भेदानुमित्यविषयत्वमित्याहुस्तदसत्, स्वभिन्नलिङ्ग-जन्यत्वस्वसजातीयभेदविषयकत्वविशेषणयोः पूर्वोक्तार्थकरणेन पूर्वोक्त-प्रयोजनसम्भवे अपि स्वविशेष्यकत्वविशेषणस्य मूलोक्तत्वाभावेन प्रयोजनाभावेन तद्घटित-लक्षणस्यायुक्तत्वात्।”**[९२] इति।

तरङ्गिणीकृता तु स्वविशेष्यकपदप्रयोजनं स्वीकृतम्। तथाहि तन्नये घटो विशेषात् भिद्यते कपालसमवेतत्वात् इत्यनुमितेरपि विशेषभिन्नलिङ्गकत्वात् विशेषप्रतियोगिकभेदविधेयकत्वाच्च तादृशानुमितविषयत्वम् आदाय अम्भववारणाय स्वविशेष्यक इत्यनुमितिविशेषणम्।

परं सुबोधिनीकारनये स्वविशेष्यकविशेषणं प्रक्षिप्तम्, तत्प्रयोजनस्य महादेवेनानुल्लेखात्। तथाहि सुबोधिनीकृतागादि – “ **स्वविशेष्यक इति तु केनचित् प्रक्षिप्तम्, न महादेवभट्टलिखितम्। तत्प्रयोजनस्य स्वयम् अनभिधाना।”**[९३] इति।

**अत्रेदं विचर्यते** यत् यदि अनुमितिविषयत्वपदस्य अर्थ अनुमित्यद्देश्यम् इति स्वीक्रियते तदा अनुमितिविशेषणतया स्वविशेष्यकपदेन प्रयोजनं नास्ति, प्रकृते अनुमाने विशेषस्य साध्यकोटिप्रविष्टत्वेन अनुमित्यद्देश्यविरहात्। किञ्च, अनुमितेः स्वविशेष्यकविशेषणं स्पष्टार्थम् इत्यपि वक्तुं शक्यते।

[९२] . का.व., सम्पा. शङ्करामशास्त्री, पृ-126
[९३]. का.व., सम्पा. मन्थितकुञ्जुनाम्बुदिरि, पृ. - 35

## न्यायसिद्धान्तमुक्तावल्याः पृथिवीप्रकरणे दिनकरीप्रभामञ्जूषाणां मतसमीक्षणम्

साधर्म्यवैधर्म्यनिरूपणानन्तरं विश्वनाथेन पृथिव्यादिद्रव्याणां निरूपणं कृतम्। तत्र पृथिवीं निरूपयता विश्वनाथेन उक्तम् –

**'तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता।'**[९४] इति।

कारिकामिमां व्याख्यातुं विश्वनाथेन निरुक्तम् – **'साधर्म्यवैधर्म्ये निरूप्य सम्प्रित प्रत्येकं पृथिव्यादिकं निरूपयति – तत्र क्षितित्यादिना। गन्धहेतुरिति। गन्धसमवायिकारणमित्यर्थः।'**[९५] इति।

न्यायसिद्धान्तमुक्तावल्याः पङ्क्तिमिमां व्याख्यायता दिनकरभट्टेन न्यगादि – **गन्धहेतुत्वं कालादौ गतमतो व्याचष्टे गन्धेति।**[९६] इति। दिनकरीकारस्य अयमस्ति आशयः- तत्र क्षितिः गन्धहेतुः इति कारिकास्थस्य गन्धहेतुः इति पदस्य गन्धसमवायिकारणम् इति मुक्तावल्यां व्याख्यातम्। तत्र यथाश्रुतस्य गन्धकारणम् इत्यर्थस्य परित्यागे बीजमाह दिनकरीकारः – गन्धहेतुत्वमित्यादि। तथाहि यथाश्रुतार्थस्वीकारे गन्धकारणत्वमिति पृथिव्या लक्षणं स्यात्। तच्च पृथिवीलक्षणं कालादौ अतिव्याप्तम्। कार्यसामान्यं प्रति कालादीनां साधारणकारणत्वाद् गन्धकारणत्वस्यापि काले सत्त्वात् पृथिवीलक्षणस्य काले अतिव्याप्त्यापत्तिर्दुर्वारा। तामतिव्याप्तिं वारयितुं गन्धहेतुरित्यस्य गन्धसमवायिकारणत्वम् इत्यर्थम् अङ्गीकृत्य

---

९४. **भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ- 135**

९५. **तत्रैव पृ- 135**

९६. **का. व., सम्पा. शङ्कररामशास्त्री, पृ-249**

समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धा -वच्छिन्नकारणत्वरूपं गन्धसमवायिकारणत्वं पृथिव्या लक्षणमित्युच्यते। तल्लक्षणं नास्ति कालादाविति नातिव्याप्तिरिति दिनकरीकारमतम्।

दिनकरीकारस्य इदं व्याख्यानं प्रभाकाराय न रोचते। तन्नये गन्धहेतुरिति। गन्धसमवायिकारणमिति मुक्तावल्या यथार्थव्याख्यानं कृतं दिनकरीकारेण महादेवेन। तथाहि दिनकरीमपाकुर्वता प्रभाकृता भणितेयं पङ्क्तिः – **'केचित्तु कालादावतिव्याप्तेरत आह गन्धसमवायीतीत्यवतरणिकामाहुः तदसत् गन्धहेतुरिति मूले गन्धपदस्य गन्धत्वविशिष्टशक्ततया गन्धपदसमभिव्याहृतहेतुपदाद् गन्धत्वविशिष्ट-निरूपितहेतुताविशिष्टस्यैव लाभात् कालादेरतादृशतया तत्रातिव्याप्तेरप्रसक्तेः।'**[९७] इति। प्रभाकारनये गन्धहेतुरित्युच्यमाने अपि पृथिवीलक्षणस्य न कालादौ अतिव्याप्त्यापत्तिः। तथाहि गन्धहेतुरित्यत्र गन्धपदस्य गन्धत्वविशिष्टरूपः अर्थः। तादृशगन्धत्वविशिष्ट-गन्धपदसमभिव्याहृतहेतुपदस्य न कारणमात्ररूपः अर्थः, अपि तु असाधारण-कारणरूप एव अर्थः। तेन च समवायेन गन्धस्यासाधारणकारणत्वं पृथिव्या लक्षणं पर्यवसितम्। किञ्च, कालस्य कार्यमात्रसाधारणकारणत्वात् न तत्र गन्धासाधारणकारणत्वरूपं पृथिवीलक्षणमव्याप्तम् इति दिनकरीव्याख्यानं न युक्तम्।

---

[९७]. का. व., सम्पा. शङ्कररामशास्त्री, पृ- 259

## न्यायसिद्धान्तमुक्तावल्यामब्निरूपणे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम्

अब्निरूपणप्रकरणे अपि न्यायसिद्धान्तमुक्तावलीपङ्क्तिव्याख्यानावसरे दिनकरी-प्रभामञ्जूषाणां मतवैमत्यं स्फुटं दृश्यते। अधस्तत्सर्वमालोच्यते –

कारिकावल्यां जलनिरूपणार्थमाह –

**'वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।'**[९८]इति।

कारिकामिमां व्याख्यातुकामेन विश्वनाथेन न्यगादि – **'जलं निरूपयति, वर्णः शुक्लः इति। स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिसिद्धिः। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जलत्वं न स्यात्, तत्र जन्यस्नेहाभावात्, तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव-नियमादिति चेत्, न, जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्न-जनकतावच्छेदकतया जलत्वजातिसिद्धिः'**[९९] इति। दिनकर्यामिदमित्थं व्याख्यातं यत्

अस्याशयः एवमवधेयः, समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्न-स्नेहनिष्ठकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जलनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणत्वात्, घटगतकार्यतानिरूपितकपालनिष्ठकारणतावद् इत्यनुमानेन विश्वनाथेन स्नेहस्य समवायिकारणतावच्छेदकतयार्थात् स्नेहरूपगुणस्य

---

९८. भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ - 164

९९. भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ- 165-166

समवायिकारणं जलं, तस्यावच्छेदकरूपेण जलत्वजातिः साधिता। अस्यानुमानस्याशयस्तावत् जलनिष्ठसमवायिकारणताया अवच्छेदकीभूतो यो धर्मः स जलत्वजातिरिति।

अत्रायं प्रश्नो नूनं स्वाभाविकः, इत्यनुमानेन यत्स्नेहगुणस्य समवायिकारणतावच्छेदकरूपेण जलत्वं सिद्धम् इति सत्यं परं तेन तु जलत्वं जातिरिति न सिद्ध्यति। एतादृशः कश्चन नियमो नास्ति यत्, यदेव समवायिकारणतावच्छेदकं तदवश्यमेव जातिर्भवेदिति। अत्र कारणं शब्दसमवायिकारणमाकाशम्, तदवच्छेदकमाकाशत्वं तु न जातिः, अपि तूपाधिरेव। एवं हि स्नेहसमवायिकारणतावच्छेदकरूपेण जलत्वस्य सिद्धावपि कथं तस्य जातित्वम्?

अत्रोच्यते यद्, यद्यपि शब्दसमवायिकारणतावच्छेदकरूपेण सिद्धमाकाशत्वं न जातिः, उपाधिरेकमात्रवृत्तित्वात् तथापि प्रकृते स्नेहसमवायिकारणताव-च्छेदकरूपेण सिद्धं जलत्वं जातिरेव, नोपाधिः, व्यक्त्यभेदादिबाधकाभावात्।

ननु तथाप्ययमत्र समायाति प्रश्नः यत् स्नेहसमवायिकारणतावच्छेदकरूपेण जलत्वस्य निरूपणानन्तरं कार्य्यतावच्छेदकरूपेण स्नेहत्वं निरूपितम्। ननु किं नाम कार्यतावच्छेदकम्? कार्यतावच्छेदकं हि कार्यमात्रवृत्तिधर्मः। किन्तु स्नेहत्वं यथा नित्यजलपरमाणुनिष्ठस्नेहे वर्त्तते तथा कार्यरूपे अवयविजलनिष्ठस्नेहे च वर्त्तते। अतः स्नेहत्वं न कार्यस्नेहमात्रवृत्ति इति न कार्य्यतावच्छेदकम्। तेन स्नेहत्वावच्छिन्नकार्यताया अप्रसिद्ध्या तदवच्छिन्नकार्यतानिरूपितकारणता-

वच्छेदकतया जलत्वजातिर्न सिद्ध्यति। अस्योत्तररूपेणोच्यते यत् जन्यत्व-विशिष्टस्नेहत्वं कार्य्यतावच्छेदकम् इति। तथा च, समवायसम्बन्धावच्छिन्न-जन्यस्नेहमात्रवृत्तिवैजात्यावच्छिन्नजन्यस्नेहनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धाव च्छिन्नजन्यजलनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानं बोध्यम्। तेन च जन्यजलत्वं सिद्धम्।

अत्र दिनकरीकृता स्वकीयं मतं प्रतिपादयताकूतं – '**नित्यवृत्तिवधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदककत्वं न सम्भवतीति शङ्कते। वस्तुतस्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव।**'[१००] इति। अर्थाद्दिनकरीकारनये अत्र कार्य्यतावच्छेदकरूपेण स्नेहत्वमित्येव वक्तव्यम्, न तु जन्यस्नेहत्वम्। इति। तथाहि नित्यानित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् स्नेहत्वमपि कार्यतावच्छेदकं भवेत्। तेन च जन्यपदं न देयम्। न च कार्यताशून्यनित्यवृत्तिधर्मस्य कथं कार्यतावच्छेदकम्, अतिप्रसक्तत्वात्, कार्यतानतिप्रसक्तधर्मस्यैव कार्यतावच्छेदकत्वादिति वाच्यम्, जलत्वावच्छिन्नकारणतानिरूपितकार्यतायाः प्रकृते स्नेहवद्वृत्यन्ताभावप्रतियोगितानवच्छेदक-जलत्वकत्वरूपाया जलपरमाणुस्नेहे अपि वर्तमानतया स्नेहत्वस्य उक्तकार्यतानतिप्रसक्तत्वात्तदवच्छेदकत्वं सम्भवत्येव इत्याशयात्।

अत्र प्रभाकारो महादेवमतं न सहते।

---

१००. का. व., सम्पा. शङ्कररामशास्त्री, पृ- 318

नित्यनित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकतास्वीकारे द्रव्यत्वजाति-साधनवेलायां कार्यसमवायिकारणतावच्छेदतया द्रव्यत्वसाधनं निष्कारणम्। अपि तु, तत्रापि पदार्थमात्रसमवायिकारणतावच्छेदकतयैव द्रव्यत्वसाधनमुचितमासीत्। किञ्च, अनित्यसंयोगविभागादीनां समवायिकारणतावच्छेदकताय द्रव्यत्वसाधनमप्यनुचितम्। किन्तु तदापि संख्यापरिमाणसमवायि-कारणतावच्छेदकतयैव द्रव्यत्वसाधनमुचितम्। तथा तु न कृतमिति अत्र नित्यानित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकाङ्गीकृत्य व्याख्यानं वालिशमतमिति प्रभावादः। तथाहि नृसिहदेवशास्त्रिणा अगादि – **‘केचित्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाज्जन्यपदं न देयमित्याहुः तदसत् तादृशधर्मस्यापि कार्यतावच्छेदकत्वे पदार्थसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिमनुक्त्वा कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्व-जातिसाधनस्य निर्बीजत्वापत्तेः संख्यापरिमाणसमवायिकारणता-वच्छेदकतया तत्सिद्धिमुपेक्ष्य संयोगादिसमवायिकारणतावच्छेदकतया तत्सिद्धिप्रतिपादकमूलविरोधापत्तेः जलनिष्ठतादात्म्यसम्बन्धावच्छिन्न-कारणतानिरूपितसमवायसम्बन्धावच्छिन्नजलनिष्ठकार्यतावच्छेदकतया सिद्धजलत्वजातेः परमाणुसाधारण्यसम्भवेनैतादृशप्रयासवैफल्यापत्तेश्च, किञ्च घटत्वस्येव पृथिवीत्व-जातेरपि दण्डकार्यतावच्छेदकत्वापत्तेरिति।**[१०१]

---

[१०१]. तत्रैव पृ- 318-319

## न्यायसिद्धान्तमुक्तावल्यास्तेजःप्रकरणे दिनकरीप्रभामञ्जूषाणां मतसमीक्षणम्

तेजोग्रन्थे दिनकरीप्रभामञ्जूषाणां मतवैमत्यं दृश्यते। इदानीम् अस्माभिः तेजस्त्वजातिसिद्धिविषये टीकाकृतां मतमालोच्यते। तथाहि तेजस्त्वसिद्धिविषये विश्वनाथेन न्यायसिद्धान्तमुक्तावल्याम् उक्तम् – **तेजो निरूपयति – उष्ण इति। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येव अनुसन्धेयम्। न च उष्णस्पर्शवत्त्वं चन्द्रकिरणादौ अव्याप्तमिति वाच्यम्। तत्रापि उष्णस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवात् अग्रहः। एवं रत्नकिरणादौ पार्थिव-स्पर्शेनाभिभवात्, चक्षुरादौ चानुद्भूतत्वादग्रहः।**[१०१] इति। विश्वानाथनये उष्णत्वं हि उष्णस्पर्शसमवेतः असाधारणधर्मः। स च उष्णत्वधर्मः वह्निरुष्ण इति प्रत्यक्षविषयतया सिद्धः। ततश्च समवायसम्बन्धावच्छिन्नजन्योष्ण-स्पर्शत्वावच्छिन्नजन्योष्णस्पर्शनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नजन्य-तेजोनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणत्वात् इति अनुमानेन जन्यः अनित्यो य उष्णस्पर्शः, तस्य समवायिकाराणं यदनित्यं तेजस्तदवच्छेदकं तेजस्त्वं जातिरिति सिद्ध्यति। ननु अनित्यतेजोवृत्तितेजस्त्वस्य सिद्धौ अपि नित्यतेजोवृत्तितेजस्त्वं कथमिति चेदुच्यते यथा जलत्वस्य नित्यानित्योभयविधजलवृत्तित्वं तथात्रापि बोध्यम्। वस्तुतस्तु समवायसम्बन्धावच्छिन्नजन्यतेजस्त्वावच्छिन्नजन्यतेजो-

---

१०१. तत्रैव पृ- 174-175

निष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नतेजोनिष्ठकारणता किञ्चिद्धर्माव-च्छिन्ना कार्यत्वादिति अनुमानेन नित्यानित्यतेजोवृत्तितेजस्त्वस्य सिद्धिर्बोध्या। अत्र एतदुल्लेख्यं यत् विश्वनाथनये जन्योष्णस्पर्शसमवायि-कारणतावच्छेदकरूपेण तेजस्त्वस्य सिद्धिः।

मुक्तावलीव्याख्यातुकामेन दिनकरीकारेण महादेवेन विश्वनाथमतमुल्लिख्य इदमुपलक्षणम् इत्युक्तम्। अर्थात् न केवलं जन्योष्णस्पर्शसमवायि-कारणतावच्छेदकरूपेण तेजस्त्वसिद्धिः। अन्यथापि तेजस्त्वस्य सिद्धिर्भवतीति तन्मतम्। तथाहि तदुक्तिः – **इत्थं च इति। उष्णत्वजातिसिद्धौ चेत्यर्थः। ननु कथं तर्हि जन्योष्णस्पर्शसमवायि-कारणभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिः इति, अत आह – तस्य इति। तेजस्त्वस्य इत्यर्थः। जलत्वस्येव इति। यथा च जन्यजलत्वावच्छिन्न-जनकतावच्छेदकतया जलपरमाणौ जलत्वजाति-सिद्धिः, तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणौ अपि तेजस्त्वरूप-जातिसिद्धिः इत्यर्थः। इदमुपलक्षणम्। समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वात् तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम्।**[१०३] इति। अस्यायम् आशयः – पृथिव्यां तेजस्संयोगाद्धि पूर्वरूपनाशस्तथा विलक्षणनीलादिरूपं जायते। अतो वक्तुं शक्यते यत् समवायसम्बन्धेन विलक्षणनीलरूपं प्रति समवायसम्बन्धेन तेजस्संयोगः कारणम् इति कार्यकारणभावो बोध्यः। तेन कारणतावच्छेदकमत्र तेजस्संयोगत्वम्। तदवच्छेदकप्रविष्टतया तेजस्त्वजातिः सिद्धा भवति।

[१०३]. का.व., सम्पा. शङ्करामशास्त्री, पृ-336

प्रभाकारः नृसिंहदेवशास्त्री तु दिनकरीमतं न सहते। तन्नये समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वे अपि तेजस्त्वजातेर्न सिद्धिः भवति। तथाहि उक्तम् नृसिंहशास्त्रिणा – **केचित्तु समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वात् तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम्। तदसत् अवयवनीलजन्यनीलं प्रति तेजस्संयोगस्य न तेजस्संयोगत्वेन हेतुता सूर्यादितेजस्संयोगसत्त्वे नीलानुत्पत्तेः किन्तु वैजात्यपुरस्कारेण। तथा च वैजात्यावच्छिन्नस्य हेतुत्वात् तादृशकारणतावच्छेदककोटौ तेजस्त्वस्याप्रविष्टत्वेन कारणतावच्छेदक-घटकतया तेजस्त्वजातिसिद्ध्यभावात्। वस्तुतस्तु इदमुपलक्षणं तेजःपदशक्यतावच्छेदकतया तेजस्त्वजातिसिद्धिः असति बाधके शक्यतावच्छेदकतया जातिसिद्धे-स्सर्वसम्मतत्वादित्यपि द्रष्टव्यम्।**[१०४] इति। प्रभाकृन्नये अवयवनीलजन्यनीलं प्रति न तेजस्संयोगः कारणं, अपि तु विजातीयतेजस्संयोगः कारणम् अर्थात् वैजात्यावच्छिन्नतेजस्संयोगः कारणम्। यदि तेजस्संयोगमात्रस्यैव कारणत्वं स्वीक्रियते तर्हि सूर्यादितेजस्संयोगे सत्यपि अवयवनीलजन्यनीलस्योत्पत्तिः स्वीकार्या। तथा तु न भवति। तस्मात् अवयवनीलजन्यनीलोत्पत्तौ विजातीयतेजस्संयोगस्यैव हेतुत्वम् अङ्गीकरणीयम्। अवयवनीलजन्यनीलोत्पत्तौ विजीतीयतेजस्संयोगस्य अर्थात् वैजात्यावच्छिन्न-संयोगस्य हेतुत्वे हेतुतावच्छेदकं कारणतावच्छेदकं वा न तेजस्त्वं, अपि तु वैजात्यमेव। तस्मात् समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन

[१०४]. का.व., सम्पा. शङ्करामशास्त्री, पृ-336

तेजःसंयोगत्वेन हेतुत्वात् कारणतावच्छेदकतया न तेजस्त्वजातिसिद्धिः। अपि तु, प्रभाकृन्नये असति बाधके शक्यतावच्छेदकतया जातिसिद्धेः सर्वसम्मतत्वात् तेजःपदशक्यतावच्छेदकतया तेजस्त्वजातिसिद्धिः।

अस्मिन् विषये मञ्जूषायां न मतसमर्थनं न वा मतविमर्दनं कृतम्। मञ्जूषायां केवलं मतद्वयमुद्धृतम् – **समवायेन विलक्षणनीलरूपं प्रति समवायेन तेजस्संयोगस्य हेतुतया तदवच्छेदकघटकतयापि तेजस्त्वजातिसिद्धिः नीलकण्ठेनोक्ता। तेजस्संयोगस्य वैजात्यपुरस्कारेणैव हेतुतया न तत्र तेजस्त्वप्रवेश इत्यन्ये**[१०५] इति।

## वायुग्रन्थे मुक्तावल्या दिनकरीप्रभामञ्जूषाटीकानां समीक्षणम्

वायुग्रन्थे मुक्तावल्या दिनकरीप्रभामञ्जूषाटीकानां समीक्षणमिदानीं क्रियते। वायुस्वरूपविषये विश्वनाथेन निरुक्ता इयं कारिका –

**'अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः।'**[१०६] इति।

अस्य व्याख्यानावसरे विश्वनाथेन निगदितम् – **'वायुं निरूपयति। अपाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामिति सत्त्वादुक्तम् – अपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति। एतेन वायवीयो विजातीयस्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति।'**[१०७] इति। पवने

[१०५]. का.व., सम्पा. शङ्करामशास्त्री, पृ-336
[१०६]. भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ-184
[१०७]. तत्रैव, पृ-184-185

अर्थाद् वायौ अपाकजः विजातीयतेजस्संयोगाजन्यः अनुष्णाशीतः नोष्णो न शीतः स्पर्शः तिष्ठति। समवायेन अनुष्णाशीतस्पर्शस्य पृथिव्यां सत्त्वे अपि तस्य पाकजत्वाद् अपाकाजानुष्णाशीतस्पर्शवत्त्वस्य वायुलक्षणस्य न पृथिव्यामतिव्याप्तिः।

दिनकरभट्टमते तु नेदम् अनुष्णाशीतस्पर्शवत्त्वं वायोर्निर्दुष्टं लक्षणम्। इदं वायुलक्षणं पटादावतिव्याप्तमिति तन्नयः। न च पटादावपि विजातीयसंयोगरूपः पाको वर्तत इति वाच्यम्, तथा सति पटस्य दग्धत्वापत्तिर्दुर्वारा। अतः पटे अपकाजानुष्णाशीतस्पर्शसत्त्वाद्वायोर्लक्षणस्यातिव्याप्तिरिति दिनकरीकारनयः। तस्माद्धि तेन निर्दुष्टं लक्षणं निरूपितं वायोः – अपाकजानुष्णाशीत-स्पर्शवन्मात्रवृत्तिद्रव्यत्व-साक्षाद्व्याप्यजातिमत्त्वम् इति। पृथिवीत्वे लक्षणस्याति-व्याप्तिवारणाय मात्रपदम्। तथाहि पृथिवीत्वं यथा अपाकजानुष्णाशीतस्पर्शवद्वृत्ति तथा अपाकजानुष्णाशीतस्पर्शवद्भिन्नपार्थिव-परमाणुवृत्ति। अतः पृथिवीत्वस्य अपाकजानुष्णाशीतस्पर्शवद्भिन्ने परमाणौ अपि सत्त्वात् लक्षणस्थमात्रपदेन लक्षणस्यातिव्याप्तिर्वारिता। पटत्वादिजातेः अपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्तित्वाद् द्रव्यत्वव्याप्यजातिमत्त्वाच्च तत्र वायुलक्षणस्यातिव्याप्तिः। अतः लक्षणे साक्षादिति पदं प्रयुक्तम्। पटत्वादिजातेः अपाकजानुष्णाशीतस्पर्शमात्रवृत्तित्वे अपि द्रव्यत्वसाक्षाद्व्याप्यत्वाभावान्न लक्षमस्य पटत्वादिजातावितव्याप्तिः। अपाकजा-नुष्णाशीतस्पर्शवद्भिन्नावृत्तिः यः धर्मः वायुघटद्वित्वम्। तद्वत्त्वस्य पटे सत्त्वाद् वायुलक्षणस्यातिव्याप्तिः। अतिव्याप्तिवारणाय लक्षणे धर्मपदमगृहीत्वा जातिपदं गृहीतम्।

अस्मिन् लक्षणे मात्रपदघटकत्वेन तथा साक्षात्पदघटकत्वेनाभाव-द्वयावच्छिन्नवृत्तित्वद्वयघटितत्वात् एकाधिकरणाधेयत्वघटितं लघुभूतं द्वितीयलक्षणं कृतं - पाकजस्पर्शवदवृत्त्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा। इति। अनुष्णाशीतस्पर्वशवद्वृत्तिपृथिवीत्ववति घटादौ अतिव्याप्तिवारणाय जातौ पाकजस्पर्शवदवृत्ति इति विशेषणम्। पृथिवीत्वस्य पाकजस्पर्शवद्वृत्तित्वेन तन्निरासः। पाजकस्पर्शवदवृत्ति जलत्ववति जले अतिव्याप्तनिवारणाय लक्षणे अनुष्णाशीतस्पर्शवद्वृत्ति इति जातिविशेषणम्। जलत्वं तु न अनुष्णाशीतस्पर्शवद्वृत्तीति तन्निरासः। तथाहि अत्र दिनकरीगीः – **'वायौ प्रमाणं दर्शयितुं मूले अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः। इत्युक्तम्। तत्र अपाकजादिपदानां क्रमेण व्यावृत्तिमाह – अनुष्णाशीतस्पर्श इति। उक्तम् अपाकज इति। यद्यपि अपाकजानुष्णाशीतस्पर्शवत्त्वं पटादौ अतिव्याप्तम्, तथापि अपाकजानुष्णा-शीतस्पर्शवन्मात्रवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, पाकजस्पर्शवदवृत्त्य-नुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थोऽव-सेयः।'**[१०८]इति।

प्रभाकारस्तु दिनकरीमतं न सहते। तन्नये अनुष्णाशीतस्पर्शवत्त्वं यद्वायोर्लक्षणं तन्निर्दुष्टम्। न तल्लक्षणं पटादावतिव्याप्तम्। अतो दिनकरकृतं वायोर्गुरुभूतं लक्षणं द्वयं निष्प्रयोजनकम्। न च अनुष्णाशीतस्पर्शवत्त्वलक्षणस्योत्पन्न-विनष्टवायाव्याप्तमिति वाच्यम् उत्पन्नविनष्टवाय्वङ्गीकारे मानाभावात्। तथाहि तदुक्तिः – **'केचित्तु पटादावतिव्याप्तिवारणाय अपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्तिद्रव्यत्व-**

[१०८]. का.व., सम्पा. शङ्करामशास्त्री, पृ- 350-351

**साक्षाद्व्याप्यजातिमत्त्वम्, पाकजस्पर्शवदवृत्त्यनुष्णाशीतस्पर्शवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थोऽवसेयः। तदसत् यथाश्रुतस्यैव निर्दुष्टत्वसम्भवे उक्तपरिष्कारस्य निर्बीजत्वात्। न च यथाश्रुतलक्षण-स्योत्पन्नविनष्टवाय्वङ्गीकर्तृमते अव्याप्तिरिति वाच्यं तादृशवायौ मानाभावात्। अथवा अनुष्णाशीतस्पर्शवद्वृत्तिवृथिवीत्ववृत्तिजातिमत्त्वमेव तल्लक्षणम् ।'**[१०९] इति।

विश्वनाथेन मूलग्रन्थे अपाकजानुष्णाशीतस्पर्शरूपविजातीयस्पर्शजनकता-वच्छेदकतया वायोः सिद्धिः विवक्षिता। तत्र चेदमनुमानं बोध्यम् – समवायसम्बन्धावच्छिन्नापाकजानुष्णाशीतस्पर्शत्वावच्छिन्नापाकजानुष्णाशीतस्पर्श निष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नवायुनिष्ठकारणता किञ्चिद्धर्माव-च्छिन्ना कारणत्वादिति। दिनकरनये इदं वायुत्वसिद्धौ उपलक्षणमात्रम्। अन्यथापि वायुत्वसिद्धिर्भवति। तथाहि तन्मतम् – "**तथा च विजातीयस्पर्श-जनकतावच्छेदकतया वायुत्वजातिसिद्धिः। इदमुपलक्षणम्। शब्दविशेषस्य वह्नित्वावच्छिन्नस्य निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिरित्यपि द्रष्टव्यम्।**"[११०] इति।

प्रभाकारेभ्यस्तु नेदं मतं रोचते। तथाहि तन्नये – '**तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः**'[१११] इति मूलकारिकयाया आदिपदद्वारा ग्रन्थकृतैव वायुत्वस्य शब्दविशेषलिङ्गज्ञाप्यत्वं वक्ष्यतीति तस्योपलक्षणतया प्रदर्शनमनुचितम्। किञ्च,

**१०९ . का.व., सम्पा. शङ्करामशास्त्री, पृ-351**
**११०. तत्रैव, पृ-351**
**१११. भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ- 185**

शब्दविशेषनिमित्तकारणरूपेण विशेषवायोः सिद्धौ अपि तदवच्छेदकतया अखिलवायुनिष्ठसाधारणवायुत्वजातिसिद्धिरसम्भवा। परं तन्नये असति बाधके शक्यतावच्छेदकतयापि जातिसिद्धिरिति नियमाद् वायुपदशक्यतावच्छेदकतया वायुत्वजातिसिद्धिर्बोध्या। तथाहि उक्तं प्रभाकृता – केचित्तु **'शब्दविशेषस्य वह्नित्वावच्छिन्नस्य निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिरित्यपि ज्ञातव्यमित्याहुः। तदसत् स्पर्शादिलिङ्गक इति मूले शब्दविशेष-लिङ्गज्ञाप्यत्वस्य वक्ष्यमाणतया तेनैव वायुत्वस्य शब्दविशेषजनकता-वच्छेदकत्वलाभेन तत्प्रदर्शनानौचित्यात् वह्नित्वावच्छिन्नं प्रति वायोर्निमित्तकारणत्वे मानाभावो वह्निविशेषं प्रति वायुविशेषस्य निमित्तत्वे अपि तादृशकारणतावच्छेदकतया सकलवायुसाधारणवायुत्वजाति-सिद्ध्यसम्भवात्। वस्तुतस्तु वायुपदशक्यतावच्छेदकतया वायुत्वजाति-सिद्धि असति बाधके शक्यतावच्छेदकतापि जातिसिद्धेरुक्तत्वादिति हृदयम्।**[११२] इति।

## आकाशग्रन्थे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्

आकाशग्रन्थे दिनकरीकृता नव्यानां मतानुसारं शब्दसमवायिकारणतया आकाशसिद्ध्यभावः सयुक्ति न्यरूपि। परं प्रभाकृत्तत्सर्वं महताडम्बरेण निराकृतम्। एतत्सर्वमधस्तात् आलोच्यते –

---

[११२]. का.व., सम्पा. शङ्करामशास्त्री, पृ- 352

दिनकरीकारः नव्यमतमित्थम् उपस्थापयति – **'नव्यास्तु शब्दनिमित्त-कारणत्वने क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वम्। न चेश्वरस्य शब्दसमवायिकारणत्वं जीवस्य वेत्यत्र विनिगमनाविरहः। जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापि मानसत्वापत्तेरदृष्टादिवत्प्रति-बन्धककल्पने चातिगौरवम्। न चैवं कर्णशुष्कलीविवराव-च्छिन्नाकाशस्य कथं शोत्रत्वोपपत्तिरिति वाच्यम्। तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तेरित्याहुः।**[११३] इति।

आशयो ह्यस्यैवं – अत्र दिनकरीकारः आकाशानङ्गीकर्तृणां नवीननैयायिकानां मतमुपस्थापयति। तेषां नये शब्दसमवायिकारणत्वेन आकाशस्य सिद्धिर्न भवति। किन्तु शब्दसमवायिकारणत्वेन ईश्वरस्यैव सिद्धिर्भवति। अत्र जिज्ञासा भवति ईश्वरो हि सर्वं कार्य प्रति निमित्तकारणमिति नियमात् शब्दस्य निमित्तकारणत्वं युक्तमीश्वरस्य, परं कथं समवायिकारणत्वमपि इति। अत्रोच्यते एकस्यैव एककार्यनिरूपितनिमित्तकारणत्व-समवायिकारणत्वयोः सम्भवादीश्वरस्यापि शब्दरूपं कार्यं प्रति युगपन्निमित्तकारणत्वं तथा समवायिकारणत्वं युक्तियुक्तम्। न केवलं शब्दविषये एव ईश्वरस्य निमित्तसमवायित्वरूपोभयहेतुत्वम्, अपि तु ईश्वरघटसंयोगं प्रति ईश्वरस्यैव समवायिकारणत्वं निमित्तकारणत्वं च। एवं शब्दनिमित्तकारणस्य ईश्वरस्यैव शब्दनिमित्तकारणत्वसम्भवाद् वक्तुं शक्यते यत् शब्दसमवायिकारणत्वेन अतिरिक्ततया आकाशस्वीकारे मानं नास्ति। यदि

---

[११३]. तत्रैव पृ- 370

कश्चन एवमाक्षिपति यत् शब्दसमवायिकारणत्वं यथा ईश्वरस्य सम्भवति तथा जीवस्यापि सम्भवति विनिगमनाविरहात् इति तदा वक्तव्यं यत्तन्न युक्तियुक्तम्। अत्र कारणं हि जीवस्य शब्दसमवायिकारणत्वं शब्दस्य जीवसमवेतत्वमपि स्वीकार्यम्। पुनश्च शब्दस्य जीवसमवेतत्वे जीवसमवेतज्ञानादिवद् जीवसमवेतस्य शब्दस्यापि मानसप्रत्यक्षविषयत्वापत्तिर्दुर्वारा। यदि च शब्दस्य मानसत्वं प्रति प्रतिबन्धकं किञ्चिदस्तीति कल्प्यते तर्हि कल्पनागौरवं ध्रुवम्। तथाहि रामरुद्र्यां निगदितम् – **अतिगौरवमिति। विनिगमनाविरहेण नानाजीवेषु शब्दसमवायिकारणताया अतिरिक्तप्रतिबध्यप्रतिबन्धक-भावकल्पनायाश्चापत्तेरिति भावः।**[११४] इति।

अत्र पुनरियमाशङ्का क्रियते यद्यदि आकाशो न स्वीक्रियते तर्हि कर्णशुष्कल्यावच्छिन्नस्याकाशस्यैव श्रोत्रत्वमिति कथम् उपपत्तिर्भवेत् इति। अत्रोच्यते आकाशाभावे कर्णशुष्कल्यावच्छिन्नस्य ईश्वरस्यैव श्रोत्रत्वोपपत्ति-र्ग्राह्या। इति नव्यानामाशय इति दिनकरीकृन्मतम्।

प्रभाकारो नृसिंहदेवशास्त्री दिनकरभट्टोपस्थापितं नव्यमतं नाङ्गीकरोति। तथाहि तन्नये शब्दस्य ईश्वरगुणत्वाभावान्न शब्दसमवायिकारणत्वेनेश्वरसिद्धिः, अपि तु शब्दसमवायिकारणत्वेनाकाशस्यैव सिद्धिर्भवति। तथाहि तद्गीः - **नव्यास्तु शब्दनिमित्तकारणत्वने क्लृप्तस्येश्वरस्यैव शब्दसमवायि-कारणत्वम्। न चेश्वरस्य शब्दसमवायिकारणत्वं जीवस्य वेत्यत्र विनिगमनाविरहः। जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापि**

---

११४. तत्रैव, पृ- 370

**मानसत्वापत्तेरदृष्टादिवत्प्रतिबन्धककल्पने चातिगौरवम्। न चैवं कर्णशुष्कलीविवरावच्छिन्नाकाशस्य कथं शोत्रत्वोपपत्तिरिति वाच्यम्। तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तेरित्याहुः। तन्न। नात्मविशषगुणो बहिरिन्द्रियग्राह्यत्वादित्यनुमानेनात्मसामान्यविशेष-गुणत्वाभावस्य साधितत्वेन शब्दस्य ईश्वरगुणत्वस्यात्यन्तासम्भावितत्वात्।**[११५] इति।

प्रभाकारस्याशयस्त्वेवं बोध्यं यद् दिनकरेण नव्यानां यन्मतमुपस्थापितं शब्दनिमित्तकारणस्य ईश्वरस्यैव समवायिकारणत्वमिति नाकाशसिद्धिरिति तन्नयुक्तम्। तत्र कारणं हि शब्दो न आत्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इति अनुमानेन मनोभिन्नेन्द्रियेण बहिरिन्द्रेयेण शब्दस्य ग्राह्यत्वात् प्रत्यक्षविषयत्वात् नात्मसामान्यगुणत्वं नाप्यात्मविशेषगुणत्वम्। एवं शब्दस्य आत्मसामान्यविशेषगुणत्वाभावाद् ईश्वरगुणत्वमसम्भवम्। तस्माच्च शब्दस्य ईश्वरसमवेतत्वाभावान्न शब्दसमवायिकारणत्वेन ईश्वरसिद्धिः, अपि तु शब्दसमवायिकारणत्वेन आकाश एवाङ्गीकार्यः इति प्रभाकृन्नयः।

पुनस्तत्र दिनकरणभट्टेन स्वतन्त्रनैयायिकानां मतं सयुक्ति उपस्थापितम्। तथाहि स्वतन्त्रानां नैयायिकानां नये शब्दः मृदङ्गीनामेव गुणः न तु आकाशस्य। अतः शब्दस्य समवायिकारणम् मृदङ्गम्, न तु आकाशम्। यदि अत्रेदम् आशङ्क्यते यन्मृदङ्गादौ अनेकत्र शब्दसमवायिकारणत्वस्वीकारे गौरवम् इति लाघवाद् आकाशस्य सिद्धिर्वाच्या तर्हि अत्रेदं वक्तव्यं यथा प्राचीनैः अनेकेषु मृदङ्गादिषु मृदङ्गत्वादिरूपेण शब्दस्य निमित्तकारणत्वं स्वीक्रियते तथा मृदङ्गत्वादिरूपेण

---

११५. तत्रैव, पृ- 370

अनेकेषु मृदङ्गादिषु शब्दसमवायिकारणत्वमपि स्वीकर्तुं शक्यते। किञ्च, मृदङ्गे शब्दः इति प्रतीतेरपि मृदङ्गादीनां शब्दसमवायिकारणं सिद्ध्यति। न च मृदङ्गे शब्द इत्यत्र मृदङ्गस्य शब्दावच्छेदकत्वमेव प्रतीयते, न तु शब्दाश्रयत्वम् इति वाच्यम्, उक्तप्रतीतेः अवच्छेदकत्वविषयकत्वे प्रमाणाभावात्। घटे रूपम् इत्यादौ सप्तम्या समवायसम्बन्धावच्छिन्नाश्रयत्वं बोध्यते, मृदङ्गे शब्द इत्यादौ अवच्छेदकत्वं बोध्यत इति वैरूप्यकल्पनायां गौरवात्। तथा च, गुणगुणिनोः समवायसम्बन्धं स्वीकृत्य समवायसम्बन्धावच्छिन्नाधारताविषयकतया घटे रूपम् इत्यादिप्रतीतिवत् शब्दमृदङ्गयोः समवायं स्वीकृत्य मृदङ्गे शब्द इति प्रतीतेः शब्दनिरूपितसमवायसम्बन्धावच्छिन्नाधारताविषयकत्वं स्वीकरणीयम्। तथा च मृदङ्गस्य शब्दसमवायिकारणत्वं निरवारयितुं न शक्यते इति स्वतन्त्रनैयायिकनयः इति दिनकरीकारमतम्। तथाहि दिनकर्यां तेन न्यगादि – **'स्वतन्त्रास्तु मृदङ्गादीनामेव गुणः शब्दः प्राचीनैरपि मृदङ्गत्वादिना निमित्तकारणतायास्स्वीकारात् मृदङ्गे शब्द इत्यादिप्रतीतेश्च। न च तत्रावच्छेदकत्वं विषयः मानाभावात् अन्यथा तत्रावच्छेदकताख्यस्वरूपस्य सम्बन्धस्यान्यत्र समवायस्य कल्पने गौरवादिति वदन्तीति।'**[११६] इति।

प्रभाकारस्तु स्वतन्त्रनैयायिकमतमपि नाङ्गीकरोति। तन्नये शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुण-पूर्वकप्रत्यक्षत्वात् सुखवत् इत्यनुमानेन शब्दस्य स्पर्शवन्मृदङ्गादीनां विशेषगुणत्वाभावः। तथाहि अत्र सत्यन्तस्य अपाकजत्वमित्यर्थः।

[११६]. तत्रैव, पृ- 370

अकारणगुणपूर्वकतप्रत्यक्षत्वात् इत्यस्य कारणगुणाजन्यत्वे सति प्रत्यक्षत्वात् इत्यर्थः। अत्र च कारणम् इत्युक्ते समवायिकारणत्वमिति बोध्यम्। एवं च स्वाश्रयसमवायिकारणनिष्ठगुणाजन्यत्वे सति प्रत्यक्षविषयत्वं हेतुः। साध्यं च स्पर्शवत्पृथिव्यादिचतुष्टयगुणभिन्नत्वम्। अत्र शब्दो हि अपाकजः, अकारण-गुणपूर्वकः प्रत्यक्षविषयश्चेति तत्र स्पर्शवत्पृथिव्यादि-चतुष्टयविशेषगुणभिन्नत्वं सिद्ध्यति। इत्थं प्रकृतानुमानेनैव शब्दस्य स्पर्शवन्मृदङ्गादिविशेष-गुणत्वाभावान्मृदङ्गादीनां शब्दसमवायिकारणत्वमप्ययुक्तम्। तथाहि प्रभाकृतामुक्तिः – **'स्वतन्त्रास्तु मृदङ्गादीनामेव गुणः शब्दः प्राचीनैरपि मृदङ्गत्वादिना निमित्तकारणतायास्स्वीकारात् मृदङ्गे शब्द इत्यादिप्रतीतेश्च। न च तत्रावच्छेदकत्वं विषयः मानाभावात् अन्यथा तत्रावच्छेदकताख्यस्वरूपस्य सम्बन्धस्यान्यत्र समवायस्य कल्पने गौरवादिति वदन्तीति। तन्न शब्दो न स्पर्शवद्विशेषगुण इत्याद्यनुमानेन शब्दस्य स्पर्शवद्विशेषगुणत्वाभावस्य साधितत्वात् मृदङ्गादिविशेषगुणत्वस्यात्यन्तासम्भावितत्वादित्याकाश-ग्रन्थः।**[११७] इति।

अत्रेदम् उल्लेख्यं यदत्र वस्तुतः दिनकरी-प्रभयोर्नास्ति मतवैमत्यम्। अत्र स्वतन्त्रनैयायिकानां नये दिनकरीकारस्यापि नास्ति साम्मत्यम्। अतो दिनकरीकारेण वदन्तीति प्रयोगः कृतः। परं दिनकरीकारेण स्वतन्त्रनैयायिकानां मतविमर्दनं नाकारि। प्रभाकृता तु स्वतन्त्रनैयायिकानां सयुक्ति मतं निराकृतमित्येव विशेषः। अत एतद्वक्तुं शक्यते यद्दिनकरीग्रन्थस्य परिपूरको हि प्रभाग्रन्थः अत्र। न च

[११७]. तत्रैव,

स्वतन्त्रनैयायिकमतखण्डनाकथनेन दिनकर्या नूनतादोष इति वाच्यम्, स्वतन्त्रनैयायिकमतखण्डनं पूर्ववर्तिना शब्दो न स्पर्शवद्विशेषगुण इत्याद्यनुमानग्रन्थेन गतार्थत्वात्। अतो दिनकरीकारः अस्मिन् विषये मौनतावम्बितेति न दोषः।

**अत्र चेदं ब्रूमः यत् शब्दस्य मृदङ्गादिगुणत्वे आश्रयादन्यत्रानुपलब्धिप्रसङ्गः, पृथिव्यादिगुणानां स्वाश्रयादन्यत्र ग्रहणाभावात्। परं शब्दस्य मृदङ्गादेः गुणिनः अन्यत्र कर्णशष्कुलीदेशे अपि ग्रहणं सर्वसम्मतम्। इति न मृदङ्गगुणः शब्दः।**

## न्यायसिद्धान्तमुक्तावल्याः कालप्रकरणे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्

आकाशद्रव्यनिरूपणानन्तरं विश्वनाथेन कारिकावल्यां कालं निरूपयता उक्तम् -

**जन्यानां जनकः कालो जगतामाश्रयो मतः।**[११८] इति।

कालं च निरूप्य कालसद्भावे प्रमाणमुपस्थाप्य पुनः प्रमाणान्तरमुपस्थापयता उक्तम् –

**परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः।**[११९] इति।

---

११८. भा.प., सम्पा. पञ्चाननभट्टाचार्य, पृ-196

११९ .तत्रैव, पृ-198

युक्तिभिः विश्वनाथेन एकः काल इति साधितः। ततश्च कालस्य एकत्वे किमसौविध्यमित्याशङ्क्य उक्तम् – **'नन्वेकस्य कालस्य सिद्धौ क्षणादिनमासवर्षादिसमयभेदो न स्यादित्यत आह – क्षणादिः'**[१२०] इति। अस्या एव पङ्क्तेः व्याख्यानार्थं दिनकरीकृतागादि – **'ननु यदि काल एक एव तदा क्षणलवकाष्ठादिनानाव्यवहारस्तत्र न स्यात्। न चैकस्मिन्नेव घटे घटः कलशः कुम्भ इति व्यवहारवदत्रापि क्षणादिनानाव्यवहारे बाधकाभाव इति वाच्यम्। एकस्मिन् विरुद्धनानाव्यवहारायोगात् न हि घटत्वकलशत्वादिकं मिथो विरुद्धं क्षणत्वादिनत्वादिकं तु विरुद्धमेव न हि क्षणं दिनमिति प्रतीतिरस्तीत्याशङ्कते।'**[१२१] इति।

दिनकरीकाराशयो हि – घटः कलशः कुम्भः इत्यादिशब्दानां विरुद्धनानाधर्मावच्छिन्नाबोधकत्वाद् एकस्मिन्नेव घटे घटः, कलशः, कुम्भः इत्येनेके शब्दाः प्रयुक्ता भवन्ति। परं क्षणः, लवः, काष्ठा इत्यादिशब्दानां क्षणत्वलवत्वादिरूपविरुद्धनानाधर्मावच्छिन्नबोधकत्वात् एकस्मिन् काले क्षणलवादिनानाशब्दप्रयोगः असम्भवः। इत्येतत्सर्वाम् आशङ्कां मनसि निधायैव विश्वनाथेन **'नन्वेकस्य कालस्य सिद्धौ'** इत्यादिवचनं निगदितम् इति दिनकरीकारस्य महादेवस्य मतम्।

दिनकरीकारमतं न सहते प्रभाकरः। तन्नये एकस्मिन् काले क्षणलवकाष्ठादिविरुद्धनानाधर्मावच्छिन्नप्रयोगरूपां दिनकरीकारोक्तामाशङ्कां मनसि

---

[१२०]. तत्रैव, पृ-200

[१२१] . का.व., सम्पा. शङ्कररामशास्त्री, पृ-374

निधाय ग्रन्थकृता विश्वनाथेन नन्वेकस्य कालस्य इत्यादिकमुक्तम् इति न युक्तम्, यतो हि क्षणत्वदिनत्वादीनां मिथो विरोधे मानाभावः। तथाहि तदुक्तिः – **'केचित्तु ननु लाघवादेककालसिद्धौ क्षणदिनादिविरुद्धनानाव्यवहारो न स्यात् नहि क्षणत्वदिनत्वादिकमविरुद्धं तथा सति दिनं क्षण इकि व्यवहारापत्तेरित्यभिप्रायेण क्षणादिः स्यादिति मूलमवतारयति नन्वित्यादिनेत्याहुः तदसत् क्षणत्वदिनत्वादीनां विरुद्धे मानाभावात्। वस्तुतस्तु नन्वेककालसिद्धौ क्षणादिविभिन्नव्यवहारो न स्याद् व्यवहर्तव्यभेदाभावादित्यभिप्रायेण मूलमवतारयति।'**[१२२] इति।

## न्यायसिद्धान्तमुक्तावल्या आत्मप्रकरणे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्

द्रव्यादीनां नवानाम् उद्देशक्रमेण निरूपणावसरे समागतस्य आत्मनः पर्यालोचनावसरे उक्तम् –

**आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्।** [१२३]इति।

तत्र न्यायसिद्धान्तमुक्तावल्यां विश्वनाथेन आत्मत्वजातिः साधिता। तन्नये सुखदुःखादिसमवायिकारणतावच्छेदकतया आत्मत्वजातिर्हि सिद्ध्यति। तथाहि उक्तम् – **'आत्मानं निरूपयति – आत्मेन्द्रियाद्यधिषत्ठातेति। आत्मत्वजातिस्तु**

---

[१२२]. तत्रैव, पृ-374

[१२३]. भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ-205

**सुखदुःखादिसमवायि-कारणतावच्छेदकतया सिद्ध्यति।'**[१२४] इति। अत्र आदिपदेन सुखदुःखानामिव ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनानामपि समवायिकारणतावच्छेदकतया आत्मत्वजातिः सिद्ध्यति इति बोध्यम्। आत्मत्वजातेः आत्मान्तरे अप्रत्यक्षत्वे अपि स्वात्मनि तस्य प्रत्यक्षं भवत्येव। अत्र कारणं हि अहं सुखी, अहं दुःखी इत्यादिप्रत्यक्षे स्वात्मा हि विषयो भवति। एतादृशावस्थायां यद्यपि आत्मत्वस्य सिद्धिः प्रत्यक्षप्रमाणद्वारा सम्भवति तथापि तत्र सकलात्मसाधारणस्य अप्रत्यक्षत्वात् जातिरूपं न सिद्ध्यति। जातिलक्षणं हि नित्यत्वे सत्यनेकसमवेतत्वं जातिलक्षणम्। जातिविषये अनेकसमवेतत्वप्रत्यक्षं प्रति अनेकव्यक्तीनां प्रत्यक्षमपि अपेक्षितं वर्तते। एवम् आत्मत्वजातेः प्रत्यक्षद्वारासिद्धेः अनुमानम् आश्रियते। तथा च, अनुमानेन सुख-दुःखादिसमवायिकारणता-वच्छेदकतया आत्मत्वजातिं साधयति।

ननु सुख-दुःखादीन् प्रत्यात्मनः कारणत्वे प्रसिद्धे एव सुखदुःखादि-समवायिकारणतावच्छेदकतया आत्मत्वजातिः सिद्ध्येत्। सुखदुःखादीन् प्रति नात्मनः कारणत्वम्। अपि तु, सुखदुःखद्वेषभावनाधर्माधर्मान् प्रति धर्माधर्मानिष्टसाधनत्व-ज्ञानानुभवविहितकर्मनिषिद्धकर्माणि कारणानि। एतेभ्यो निमित्तकारणेभ्य एव तत्तदात्मसु सुखदुःखादीनां तत्तद्विशेषगुणानामुत्पत्तिः सम्भवतीत्यात्मनः सुखदुःखादीन् प्रति पृथक्तया कारणस्वीकारः अनावश्यकः। अन्यदीयसुखस्य अन्यात्मनि उत्पत्तिनिवारणार्थं सुखदुःखादीन् प्रति तादात्म्येनात्मनः कारणत्वं स्वीकार्यमासीत् परं समवायेन धर्मस्य सुखं प्रति कारणत्वे स्वीकृते

---
१२४. तत्रैव, पृ-205-206

उक्तापत्तिर्दूरीभूता भवति। यद्यपि भावकार्यमात्रं प्रति सामवायिकारणमावश्यकमिति नियमात् सुख-दुःखादीन् प्रति सत्सु अपि धर्माधर्मादिषु निमित्तकारणेषु समवायिकारणत्वेन आत्मा स्वीकार्यस्तथापि भावकार्यं प्रति समवायिकारणतावच्छेदकरूपेण द्रव्यत्वस्य अथवा तद्व्यक्तित्वस्य वा स्वीकारे अप्युक्तनियमस्य निर्वाहो भवतीति सुख-दुःखादीनां समवायिकारणतावच्छेदकरूपेण आत्मत्वजातिसद्धिरनावश्यिकी।

अत्र केचन प्राचीना आचार्या गदन्ति यत् कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वम् इति नियमात् कार्यमात्रवृत्तिसुखत्वदुःखत्वादीनां यत्किञ्चिन्निष्ठकारणता-निरूपितकार्यतावच्छेदकत्वं वक्तव्यम्। अतः सुखत्वादेः आत्मत्वावच्छिन्न-कारणतानिरूपितकार्यतावच्छेदकत्वनिर्वाहाय सुखत्वाद्यवच्छिन्नं प्रति आत्मत्वेन कारणत्वं कल्पनीयम्। यद्यपि सुखत्वावच्छिन्न-कार्यतानिरूपितकारणतावच्छेदकता सत्तायां द्रव्यत्वे वा स्वीकर्तुं शक्यते तथा प्रागुक्तरीत्या समवायसम्बन्धेन सुखदुःखादीन् प्रति धर्माधर्मादीनां निमित्तकारणत्वे स्वीकृते उपर्युक्तव्यभिचारः दूरीकर्तुं शक्यते तथापि व्याप्यो लघुभूतश्च यो धर्मस्तस्य कारणतावच्छेदकत्वे सम्भवति व्यापकस्य धर्मस्य कारणतावच्छेदकत्वं न युक्तम् इति नियमात् व्याप्यस्य आत्मत्वस्यैव सुखादिकारणतावच्छेदकत्वं स्वीकार्यम्। अस्मिन् प्रसङ्गे हि दिनकरीकारेण सुखादिकं प्रति आत्मनो द्रव्यत्वेन कारणत्वे अनुपपत्त्यनन्तरम् आह – **'वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिदन्नं प्रति आत्मत्वेन हेतुत्वम् आवश्यकम्।'**[१२५] इति।

[१२५] . का. व., सम्पा. शङ्कररामशात्री, पृ-382

तदाशयस्त्वित्थम् – द्रव्यत्वस्य मनस्यपि सत्त्वात् तत्र ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुत्वं वक्तव्यम्। मनसि हि आत्मत्वविरहान्न ज्ञानोत्पत्त्यापत्तिः। तथा च ज्ञानत्वावच्छिन्नसमवायि-कारणतावच्छेदकतया आत्मत्वजातिसिद्धिः इति भावः।

प्रभाकारस्तु नेदं मतं सहते। तथाहि तेन उक्तम् – **'केचित्तु वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिदन्नं प्रति आत्मत्वेन हेतुत्वम् आवश्यकमिति व्याचक्रुः। तदसत् तथापि तावतापीश्वरे ज्ञानोत्पत्त्यापत्तेर्दुर्वारत्वात्। न च समवायेन ज्ञानोत्पत्तौ शरीरस्यावच्छेदकतया ईश्वरस्य शरीराभावेन न तत्र समवनायेन ज्ञानोत्पत्त्यापत्तिरिति वाच्यं तथा सति मनसः अपि शरीराभावेनैव तत्र ज्ञानोत्पत्त्यभावात् आत्मत्वेन हेतुत्वे उक्तापत्तिवारणरूपप्रमाणासम्भवात्। ... वस्तुतस्तु आत्मपदशक्यता-वच्छेदकतया आत्मत्वजातिसिद्धिः असति बाधके शक्यतावच्छेदकतया जातिसिद्धेः सकलतन्त्रसिद्धत्वाददृष्टपदस्य नानार्थकत्वेनादृष्टपदशक्यता-वच्छेदकतया जातिसिद्धेरपि वरितत्वात्।'**[१२६] इति। अत्र प्रभाकारस्यायमाशयः – यदि ज्ञानादीन् प्रति आत्मत्वेन आत्मनः समवायिकारणत्वं स्वीक्रियते तर्हि आत्मनि अर्थात् जीवात्मनि तथा परमात्मनि ज्ञानोत्पत्तिः स्वीकर्तव्या। परमीश्वरो हि नित्यज्ञानवान् भवति इति न्यायसिद्धान्तः। अतः स्वसिद्धान्तविरोधापत्तिर्दुर्वारा। किञ्च, यदि शरीरावच्छेदकतया आत्मनः ज्ञानादीन् प्रति कारणत्वम् अङ्गीक्रियते तर्हि नेश्वरे ज्ञानोत्पत्तेरापत्तिरिति चेत्तेनैव मनसि अपि ज्ञानोत्पत्त्यापत्तिर्निराकृताभवतीति

---

[१२६] . तत्रैव, पृ - 381

तेनैव ज्ञाननादीन् प्रत्यात्मनः कारणत्वं वक्तव्यं न त्वात्मत्वेन। तेन च मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिदन्नं प्रति आत्मत्वेन हेतुत्वम् वक्तव्यं तथा ज्ञानादिसमवायिकारणतावच्छेदकतयात्मत्वजातिसिद्धिः इति महादेवमतं तुच्छम्। परं असति बाधके शक्यतावच्छेदकतया जातिसिद्धिनियमादत्र आत्मपदशक्यता-वच्छेदकतया आत्मत्वजातिसिद्धिः बोध्या इति प्रभाकृतां सिद्धान्तः।

## न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षप्रकरणे दिनकरी-प्रभा-मञ्जूषाणां समीक्षात्मकमध्ययनम्

लौकिकसन्निकर्षान् निरूप्य अलौकिकसन्निकर्षनिरूपणार्थम् कारिकेयं कीर्तिता विश्वनाथेन –

**‘अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।**

**सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा।।’**[१२७] इति।

कारिकामिमां व्याख्यातुकामेन विश्वनाथेन न्यगादि – **‘एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं, तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा वर्णिताः। अलौकिकसन्निकर्षस्त्विदानीमुच्यते – अलौककस्त्विति। व्यापारः सन्निकर्षः।’**[१२८] इति।

[१२७]. भा. प., सम्पा. पञ्चाननभट्टाचार्य, पृ - 297
[१२८]. तत्रैव, पृ - 297

दिनकरीकारेण ग्रन्थस्यास्य व्याख्यानावसरे उक्तं यत् त्रिष्वलौकिकेषु सन्निकर्षेषु अन्यतमो हि सामान्यलक्षणः सन्निकर्षः। सामान्यस्य नित्यत्वात् तत्र तज्जन्यत्वे सति तज्जन्यजनको व्यापारः इति व्यापारलक्षणं न गच्छति। अतो हि मूलकृता व्यापारपदस्य सन्निकर्षरूपः अर्थः कृतः। तथाहि तेनोक्तम् – '**धूमत्वादि-सामान्यलक्षणाया इन्द्रियजन्यत्वाभावाद्व्यापारकथनमसङ्गतम् अत आह – व्यापारः सन्निकर्ष इति।**'[१२९] इति।

दिनकरीकारमतं न रोचते प्रभाकृते। तन्नये यथा धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावस्तथा इन्द्रियासम्बन्धत्वम् अपि। ननु कथं धूमत्वादिसामान्यस्य इन्द्रियासम्बन्धत्वम् इति चेदुच्यते यत् इन्द्रियसन्निकर्षत्वं नाम इन्द्रियसम्बन्धत्वमेव। तच्च इन्द्रियप्रतियोगिकसम्बन्धत्वम्। वस्तुतस्तु इन्द्रियप्रतियोगिकः पदार्थो हि इन्द्रियसन्निकर्षः। यतो हि येन सम्बन्धेन इन्द्रियं कस्मिंश्चित् पदार्थे तिष्ठति स एव इन्द्रियसन्निकर्षः। धूमत्वादिसामान्ये इन्द्रियसत्त्वाभावात् धूमत्वादिसामान्यं नेन्द्रियप्रतियोगिकमिति नेन्द्रियप्रतियोगिकसम्बन्धत्वम् । अतः वक्तुं शक्यते यत् यथा धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावस्तथा इन्द्रियासम्बन्धत्वम् अपि। तस्माद्धि दिनकरीकारोक्तं धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वा-भावाद्व्यापारकथनमसङ्गतम् अत आह – व्यापारः सन्निकर्ष इति न युक्तम् इति प्रभाकृन्नयः। तथाहि तेन उक्तम् – '**केचित्तु धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावाद्व्यापारकथनमसङ्गतम् अत आह – व्यापारः सन्निकर्ष इति। तदसत्। धूमत्वादेरिन्द्रियाजन्यत्ववत् इन्द्रियासम्बद्ध-**

[१२९]. का. व., सम्पा. शङ्करशास्त्री, पृ - 458

**त्वात्तत्सम्बन्धत्वस्यापि अनुपपत्त् तदसम्बद्धस्य तत्सम्बन्धत्वे प्रमाणाभावात्।’**[१३०] इति नालं पल्लवितेनेति शिवम्।

१३०. का. व., सम्पा. शङ्कररामशास्त्री, पृ- 459

● **उपसंहारः**

**जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्म्मणोः।**

**ह्रासदर्शनतः ह्रासः ...**[१३१] इति विदितमेव विदुषां सुभाषितमुदयनाचार्याणाम्। अतो मनुजनूनां स्वाध्यायविद्यादिह्रासात् अनायासतत्त्वावधारणेन विद्यासमृद्धये बालानां सुखबोधाय च सम्प्रति आकरग्रन्थानां व्याख्याबन्धनिबन्धनप्रयासो विदुषाम्। परं नासौ मुनिर्यस्य मतं न भिन्नम्। तथात्वे सिद्धान्तमुक्तावल्याः टीकाकृतामपि मतेषु मिथो वैमत्यं विद्वद्विप्रतिपत्तिजनकं स्यादित्यत्र कः संशयः? अतः प्रसिद्धानामेव प्रभा-मञ्जूषा-दिनकरीयाणामत्र विश्लेषणं विहितम्।

प्रभाकृता श्रीनृसिंहशास्त्रिणा प्रायः सर्वत्रैव विविच्य मूलभाववर्णनेन अतिललितपदसन्दर्भणेन व्याख्याभेदप्रकारप्रदर्शनेन विविधोदाहरणैस्स्वोक्तिप्रामाण्य-व्यवस्थापनेन मुक्तावलीवाक्यार्थवर्णनेन मूलग्रन्थग्रन्थिमोचनैकलक्ष्येण प्रधानतः स्वकीयसिद्धान्तोपस्थापनशैल्या दिनकरीयापकर्षख्यापने एव प्रयत्नो महान् विहितः। तदीयान्तेवासिना श्रीपट्टाभिरामशास्त्रिणा तु अतिविस्तृता दुरूहपरिष्कारघटिता नवीनशाब्दबोधपरिष्काररीत्या दिनकरीयखण्डनेन क्वचिच्च महादेवसमर्थनेनानितर-साधारणी कृतिरुपन्यस्ता। वस्तुतस्तु दिनकरीकाराभ्यां बालानां सुखबोधायैव क्लेशरहितं सरलमतिसुबोधं व्याख्यानं यदुपन्यस्तं तद्बहुधा खण्डितमपि बालानां हितकरं प्रियञ्च। किन्तु दिनकरीगर्हणेच्छया प्रवृत्ता प्रभा क्वचिदतिकठिना दुरूहा

---

[१३१]. न्या. कु., सम्पा. श्यामापदमिश्र, पृ - 56

नव्यन्यायभाषाशैल्याश्रितात्यल्पविदुषामेव प्रिया। मञ्जूषा च यथा शाब्दबोधप्रपञ्चनपरा प्रतिपदं शाब्दबोधपरिष्काररीत्या बालानां सुगमा तथा ग्रन्थान्तरविमतविमर्दिनी अपि क्रोडपत्रवत्प्रिया समेषामेव विदुषाम् इति नातिशयोक्तिरेषा। सर्वैरेव टीकाकृद्भिः स्थलविशेषेषु शास्त्रान्तरेषु दर्शनान्तरेषु च स्वपाण्डित्यप्रदर्शनमुखेन नवीनमतोपस्थापनेन मुक्तावल्या एव माहात्म्यं दिक्षु प्रसारितम्। टीकाकाराः सर्वथैव मूलकारापेक्षया सङ्गततराः मुखराश्च भवन्तीति अत्रापि परिलक्षितम्। तथापि सर्वेषु मञ्जूषाकारा अप्रतिमप्रतिभाधरा विचारतीक्ष्णतायामन्यानतिशेते इति ममायमनुभव इति शिवम्।

उपान्तिमे मद्गवेषणकार्यमिदम् उपसंह्रियते। इदं कार्यं मे चतुरध्यायात्मकम्। तत्रोपोद्घाते मद्गवेषणबन्धबन्धननिमित्तानि बहुधा निरूप्य व्याकरणदिशा गवेषणबन्धाभिधातात्पर्यं च पर्यालोच्य मद्गवेषणबन्धोपयोगित्वं विततं मया। किं बहुना संशयिते अर्थे विचारप्रवृत्ते दिनकरीप्रभामञ्जूषाणां कुत्र कीदृशः संशयः, कीदृशश्च तत्समाधिरित्येतत्सर्वं यथामति सविशदं व्याहृतम्।

चतुरध्यायात्मकस्य मद्गवेषणकार्यस्य प्रथमे **मुक्तावलीमुक्तावली-कृत्परिचितिः** इत्याख्ये अध्याये चर्चितेभ्यो विषयेभ्यः सारांशा केचन उपस्थाप्यन्ते – विश्वनाथसिद्धान्तपञ्चाननपरिचये प्रदर्शितं यत् विद्यानिवासस्य पुत्रस्तथा रुद्रन्यायवाचस्पतेर्भ्राता तथा वाराणसीनिवासी अयं विश्वनाथः। न्यायसूत्रवृत्तिः, कारिकावली तथा न्यायसिद्धान्तमुक्तावली, आख्यातवादटीका, नञ्वादटीका, पदार्थतत्त्वालोक इत्याद्यः कृतयस्तस्य सुप्रसिद्धा इति दर्शितम्। न्यायशास्त्रे

सिद्धान्तमुक्तावल्याः स्थानं महत्त्वञ्च कीदृशमिति सविशदं ग्रन्थस्थविषयप्रतिपादनेन निरूपितम्। सिद्धान्तमुक्तावल्यां प्राचामाचार्याणां गौतमकणादप्रशस्तपादाचार्याणां तथा मीमांसाशास्त्रनव्यन्यायशास्त्रादिग्रन्थान्तराणाञ्च प्रभावः सोदाहरणं प्रतिपादिताः। ततश्च न्यायसिद्धान्तमुक्तावली कथं नव्यन्यायशैल्या विषयान् प्रतिपादयतीति पङ्क्तीरुद्धृत्य प्रदर्श्य एतावत्कालपर्यन्तं समुपलभ्यमानानां समस्तानां टीकानां नामग्रहमुल्लेखः कृतः। इत्थं प्रथमे अध्याये न्यायसिद्धान्तमुक्तावल्याः कर्तुस्तथा तत्कर्तृकतीनां परिचयः सविततं समुपन्यस्तः।

**दिनकरीदिनकरीकारपरिचय** इत्याख्ये द्वितीये अध्याये चर्चितानां विषयाणां सारस्त्वेवम् - आदावेव मुक्तावलीव्याख्यासु दिनकर्य्याः स्थानं वैशिष्ट्यं च कीदृशम् इति प्रतिपादितम्। तत्र समुपलभ्यमानासु न्यायसिद्धान्तमुक्तावल्याष्टीकासु दिनकरी हि न्यायसिद्धान्तमुक्तावल्याः प्रतिपङ्क्ति सरलया नव्यशैल्या च विषयान् प्रतिपादयन्ती इतराष्टीका अतिशेत इति सोदाहरणमुपस्थापितम्। किञ्च, सप्रमाणं प्रदर्शितं यद् दिनकरी टीका महादेवेन प्रारब्धा तत्सुतेन दिनकरेण समापिता। इत्थम् अस्मिन्नध्याये वस्तुतो न्यायसिद्धान्तमुक्तावल्याः टीकान्तरेभ्यो वैशिष्ट्यं प्रतिपादयता दिनकर्यास्तथा दिनकरीकारस्य परिचय सविशदम् उपस्थापितः।

मद्गवेषणबन्धस्य तृतीयाध्यायः **प्रभामञ्जूषाकृत्परिरितिः** इति। अस्मिन्नध्याये प्रभाटीकाकर्तुः नृसिंहदेवशास्त्रिणः तथा मञ्जूषाकारस्य नृसिहंदेवशास्त्रिशिष्यस्य पट्टाभिरामशास्त्रिणः परिचय उपस्थापितः। किञ्च, अत्र प्रभाटीकायास्तथा मञ्जूषाटीकाया वैशिष्ट्यं सविशदमुस्थापितम्। अत्रेदमुल्लेख्यं यद्भगवता अस्मिन्

गवेषणबन्धबन्धने नियुक्तः अयमधमः अपि प्रभाकारस्य तथा मञ्जूषाकारस्य सम्प्रदायान्तर्भुक्तस्तथा परम्परया शिष्यः। अत्र पट्टाभिरामशास्त्रिजीवित-चरितमनुसन्दधता मया ज्ञातं यत् प्रभाकर्तुर्नृसिंहरायदेवशास्त्रिणः शिष्यः पट्टाभिरामशास्त्री सुविख्यातस्य कलिकाताविश्वविद्यालयस्य संस्कृतविभागे अध्यापितवान्। पट्टाभिरामशास्त्रिणः सुविख्यातच्छात्रेषु वङ्गेषु कश्चन प्रथितयशाः पण्डितमूर्धन्यः वेदपारावारीणो मे गुरुरिति परम्परया मद्गुरुरयं मञ्जूषाकृत्तथा तद्गुरुर्नृसिंहदेवशास्त्री अपि परम्परया मे गुरुरिति कृतकृत्यः अहम्।

मद्गवेषणबन्धस्य अन्तिमश्चतुर्थः अध्यायो हि **न्यायसिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम्** इति। अस्मिन्नध्याये न्यायसिद्धान्तमुक्तावल्याः मङ्गलवादे, ईश्वरवादे, पदार्थोद्देशवादे, सादृश्यातिरिक्तवपदार्थत्वानुमानवादे, विशेषवादे, पृथिवीप्रकरणे, अब्निरूपणे, तेजःप्रकरणे, वायुग्रन्थे, आकाशग्रन्थे, कालप्रकरणे, आत्मप्रकरणे, प्रत्यक्षप्रकरणे दिनकरीप्रभामञ्जूषाणां मतानि समीक्षितानि। अध उक्तविषयेषु टीकाकृतां मतानि समीक्ष्य केचन विचाराः प्रस्तूयन्ते -

न्यायसिद्धान्तमुक्तावल्या आदौ “**विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति**...”[१३२] इत्यत्र विघ्नविघाताय पदघटकीभूतविघातपद-निष्पत्तिः कथमिति चेद् विपूर्वकाद् हन्तेर्घञा इति। नाशः, उत्पत्तिमदभाव इति तदर्थः। ननु घातपदस्यैवोत्पत्तिमदभाववाचकत्वाद् विपदस्यानर्थक्यमित्याशङ्क्य महादेवेन दिनकरीये समाधिर्गदितः।

[१३२] . का. व., सम्पा. शङ्कररामशास्त्री, पृ-10

मञ्जूषकृता महादेवकृतसंशीतिस्तच्छित्तिश्च भूयसा तिरस्कृता। वीत्यपुसर्गस्य द्योतकत्वेन शक्तत्वाभावान्न पदत्वमिति पदत्वमाश्रित्य **विपदमनर्थकम्** इत्याक्षेपस्तथा **विपदं सार्थकमिति** समाधिर्निर्युक्तिकः। **अत्र ब्रूमो यद्** मञ्जूषाकृता यदुक्तं तत्तु न रुचिकरम्। अत्र कारणं हि नव्यनैयायिकेन नैयायिककुलचक्रवर्तिना गदाधरेणापि हन्-नाशादिधातूनामुत्तपत्तिमदर्थः स्वीकृतः। न केवलमेतादृशः अर्थः स्वीकृत एव गदाधरेण अपि तु, सयुक्ति तत्र प्रतिपादितः। तथाहि व्युत्पत्तिवादस्य लकार्थप्रकरणे निगदितं तेन – **वस्तुतस्तु नाशत्वमुत्पत्तिमदभावत्वम्।**[१३३] इति। अतो विपूर्वाद्धन्धातोरुत्पत्ति-मदभावत्वरूपार्थमनङ्गीकृत्य शङ्काया उत्थापनमेवानुचितम् इति मे मतिः।

दिनकरीकृन्नये ईश्वरवादे न्यायसिद्धान्तमुक्तावलीस्थं मौलं क्षित्यङ्कुरादिकम् सकर्तृकम् कार्यत्वाद् इत्यनुमानं प्रति पूर्वपक्षिणोपस्थापिते क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात्, आकाशादिवत् इत्यनुमाने सत्प्रतिपक्षदोषदर्शनं हि उपलक्षणमात्रम्। तथा च प्रत्यनुमाने अनुकूलतर्काभावरूपदोषकथनं सत्प्रतिपक्षहेत्वाभासस्य शरीररूपव्यर्थविशेषणविशिष्टत्वात् व्याप्यत्वासिद्धिरूपदोषान्तरस्य अजहल्लक्षणया कथनम्। परमेतत्सर्वं प्रभाकारो न सहते। तन्नये न व्यर्थविशेषण-विशिष्टत्वाच्छरीराजन्यत्वहेतुर्व्याप्यत्वासिद्धः। शरीररूपव्यर्थविशेषणोपादानेन अधिकनामकनिग्रहस्थानप्रसङ्गः, न तु व्याप्यत्वासिद्धिः इति।

**अत्रेदं वक्तव्यं** यद्दिनकरीकारेण यदुक्तं तत्सर्वं प्राचीनमतानुसारि। प्राचीनमते हि व्यभिचारावारकविशेषणघटितत्वं हि व्याप्यतानवच्छेदकत्वे

---

[१३३]. व्यु. वा., सम्पा. सुब्राह्मण्यशास्त्री, पृ- 104

व्यर्थविशेषणत्वे च कारणम्, किन्तु न लघुधर्मसमनैयत्यं न। अत एव महादेवेन गुरुधर्मस्यानवच्छेदतकया इत्येतावन्मात्रमुक्तम्। परं मञ्जूषाकारेण नवीनमतानुसारेण व्याख्यतमिति न दिनकरीकारमतमयुक्तम्। प्राचां नयानुसारं दिनकरीकारमतमपि युक्तम् एव।

किञ्च, न्यायसिद्धान्तमुक्तावल्याः **ननु मङ्गलं न विघ्नध्वंसं प्रति**[१३४].. इत्यादिपङ्क्तिं व्याख्यातुकाम आदावेव भूमिमारचयति **ननु निष्फलत्वान्मङ्गलाचरणमयुक्तं, न च निष्फलत्वमेव तस्यासिद्धं, फलविशेषशून्यत्वेन हेतुना तत्साधनादित्यभिप्रायेणाशङ्कते नन्वि**[१३५]ति।

परं प्रभाकृन्न दिरकरीकारमतं सहते। अर्थात् फलविशेषशून्यत्वेन निष्फलत्वान्मङ्गलाचरणं निर्युक्तिकमिति पूर्वपक्षप्रकाशनार्थं न्यायसिद्धान्तमुक्तावल्यां **ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्**[१३६] इति विश्वनाथोक्तिरिति दिनकरीनयं न गृह्यते प्रभाकृता। तथाहि

**<u>अत्रेदं विचार्यते यद्</u>** महादेवेन फलविशेषशून्यत्वपदेन यावत्फल-विशेषाभावो बोधितः। तेन न कश्चन व्यभिचारः। न च मूलकृता मङ्गलस्य फलत्वेन समाप्तिविघ्नध्वंसयोरुल्लेखात् न तदितरयावत्फलविशेषाभावो मङ्गले सिद्ध इति वाच्यम्, समाप्तिविघ्नध्वंसातिरिक्तपशुपुत्रादिफलशून्यत्वस्य मङ्गले सर्वसम्मतत्वात्। किञ्च, मङ्गले समाप्तिविघ्नध्वंसातिरिक्तफलाभावसाधन एव ग्रन्थस्य सिद्धसाधनत्वात् दुष्टत्वापत्तिरापतेत्। अतः समाप्तिविघ्नध्वंसरूपफलशून्यत्वसाधनेन

---

[१३४] . न्या. मु., सम्पा. श्रीकृष्णवल्लभाचार्य, पृ - 8

[१३५] . का.व., सम्पा. श्रीशङ्कररामशास्त्री, पृ- 14-15

[१३६] का. व. सम्पा. पञ्चाननशास्त्री, पृ. - 4

यावत्फलविशेष-शून्यत्वसिद्धिर्निश्चिता। तेन च स्वर्गादिफलके निष्फलत्व-रूपसाध्याभाववति यागे समाप्तिविघ्नध्वंसयोरभावे अपि तदतिरिक्तस्वर्गादिफलसत्त्वे यावत्फलविशेषशून्यत्व-रूपहेतोरसत्त्वान्न व्यभिचार इति मङ्गलं निष्फलं फलविशेषशून्यत्वादित्यनुमानस्य निर्दुष्टत्वं सिद्धम्। तथा च ननु न च मङ्गलमित्यादि मूलस्य भूमिरूपेण दिनकरीकृता यदुक्तं यत् मङ्गलं निष्फलं फलविशेषशून्यत्वात् इत्यनुमानानेनानेन पूर्वपक्षिसम्मतमङ्गलनिष्फलत्वप्रख्यापनार्थं नन्वित्यादि न्यगादि विश्वनाथेन इति तद्धि निर्दुष्टमिति सिद्धम्।

पुनश्च, विश्वनाथेन कारिकावल्यां सप्त पदार्थाः न्यायवैशेषिकसम्मता इति प्रतिपादितम्। नन्वन्यैः शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वेनाङ्गीकारात्कथमत्र सप्त पदार्था इत्युच्यते इति शक्तिसादृश्यादीनामतिक्तपदार्थत्वं खण्डयता तेनागादि – **ननु कथमेते एव पदार्थाः, शक्तिसादृश्ययोरपि अतिरिक्तपदार्थत्वात्। तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते।**[१३७] इत्यादि। मौलमिदं वाक्यं व्याख्यातुकामेन दिनकरीकारेण प्रतिपादितं यत् पदार्थाः सप्त कीर्तिताः इति मूलमयुक्तमिति प्राभाकरमतमाश्रित्य विश्वनाथः शङ्कते ननु कथमेत एवेत्यादिनेति।

प्रभाकारस्तूक्तव्याख्यानं महादेवस्य न स्वीकरोति। तन्नये मौल आक्षेपस्तु शक्तिसादृश्ययोरतिरिक्तपदार्थत्वेन। परं शक्तेरतिरिक्तपदार्थत्वस्य प्रभाकरमीमांसक-सम्मतत्वे अपि सादृश्यस्यातिरिक्तपदार्थत्वस्य तदसम्मतत्वादालङ्कारिक-

[१३७]. भा.प., सम्पा. पञ्चाननभट्टाचार्य, पृ-19-20

सम्मतत्वाच्च भ्रमात् प्राभाकरश्शङ्कते इत्युक्त्वा मौलाक्षेपस्य भूमी रचिता दिनकरीकृतेति दुष्टं महादेवव्याख्यानम्।

**अत्रेदं ब्रूमो** यत् मीमांसकदर्शने भट्टैः कुमारिलैः पञ्च पदार्था अङ्गीकृताः। ते हि – द्रव्यं, गुणः, कर्म, अभावः, सामान्यञ्च। परं प्राभाकरैः द्रव्य, गुणः, कर्म, सामान्यं, समवायः, सादृश्यं, शक्तिः इत्येते अष्टौ पदार्थाः स्वीकृताः। प्राभाकरसम्प्रदायानुसारं ग्रथितायां प्रकरणपञ्चिकायां व्याख्यातेषु प्राभाकरसम्मतपदार्थेषु अनन्यं हि सादृश्यम् । अतः सादृश्यं न केवलमालङ्कारिकैः प्राभाकरैरप्यङ्गीकृतमिति तन्मतमाशङ्क्य पूर्वपक्षमतोपस्थापनं ग्रन्थकर्तुरिति व्याख्यानं दिनकरीकृतो युक्तमेवेति मे मतिः।

विशेषवादे विशेषस्य स्वतोव्यावृत्तत्वस्वरूपं परिष्कुर्वता महादेवेन दिनकर्यामुक्तम् – "**स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गजन्यस्वविशेष्यक-स्वसजातीयेतर-भेदानुमित्यविषयत्वम्।**"[१३८] इति। दिनकरीकारकृतं स्वतो-व्यावृत्तत्वलक्षणं न स्वीकृतं प्रभाकृता। तन्नये स्वतोव्यावृत्तलक्षणे स्वविशेष्यकपदं निष्प्रयोजनकम्। अतस्तन्नये निष्प्रयोजनकपदघटितत्वात् स्वतोव्यावृत्तत्वलक्षणम् अयुक्तम्। **अत्रेदं विचर्यते** यत् यदि अनुमितिविषयत्वपदस्य अर्थ अनुमित्यद्देश्यम् इति स्वीक्रियते तदा अनुमितिविशेषणतया स्वविशेष्यकपदेन प्रयोजनं नास्ति, प्रकृते अनुमाने विशेषस्य साध्यकोटिप्रविष्टत्वेन अनुमित्यद्देश्यविरहात्। किञ्च, अनुमितेः स्वविशेष्यकविशेषणं स्पष्टार्थम् इत्यपि वक्तुं शक्यते।

---
[१३८] का.व., सम्पा. शङ्करामशास्त्री, पृ-119

# सहायकग्रन्थग्रामाः

## ❖ आकरग्रन्थग्रामाः (Primary Source)


अन्नंभट्टः। *तर्कसंग्रहः* (नवटीकासहितः)। सम्पा. सात्करिशर्मा, वाराणसी**:** चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2003 (चतुर्थसंस्करणम्)।

अन्नंभट्टः। *तर्कसंग्रहः* (दीपिका-अध्यापनासहितः)। सम्पा. श्रीनारायणचन्द्रगोस्वामी, कलिकाता**:** संस्कृत-पुस्तक-भाण्डारः, 1413 (तृतीयसंस्करणम्)।

उपाध्यायः, गङ्गेशः। *तत्त्वचिन्तामणिः* (प्रत्यक्षखण्डात्मकः)। सम्पा. कामाख्यानाथतर्क-वागीशः, देहली**:** मोतिलाल-वनारसीदासः, 1897 (प्रथमसंस्करणम्)।

उदयनाचार्य्यः। *न्यायकुसुमाञ्जलिः* (व्याख्याचतुष्टयोपेतः)। सम्पा. वच्चा-झाः, वाराणसी**:** चौखम्बा-संस्कृत-सिरिज्-अफिस्, 1957(प्रथमसंस्करणम्)।

गौतमः। *न्यायदर्शनम्* (भाष्य-वार्त्तिक-तात्पर्यटीका-वृत्तिसहितम्)। सम्पा. अमरेन्द्रमोहन-तर्कतीर्थः तारानाथतर्कतीर्थश्च, नवदेहली**:** मुन्सिराम-मनोहरलाल-पाब्लिशार्स्, 1985.

गौतमः। *न्यायदर्शनम्* (प्रथमखण्डात्मकम्)। सम्पा. फणीभूषणतर्कवागीशः, कलिकाता**:** पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, 2014 (चतुर्थप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *कारिकावली* (प्रभा-मञ्जूषा-दिनकरीय-रामरुद्रीय-गङ्गारामीय-सहिता)। सम्पा. शङ्कररामशास्त्री, वाराणसी: चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2016 (पुनर्मुद्रणम्)।

न्यायपञ्चाननः, विश्वनाथः। *कारिकावली* (मुक्तावली-दिनकरी-रामरुद्रीसनाथिता)। सम्पा. आत्मारामशर्मा, वाराणसी: चौखम्बा-संस्कृत-सिरिज्-अफिस्, 2012.

न्यायपञ्चाननः, विश्वनाथः। *कारिकावली* (मुक्तावली-दिनकरी-रामरुद्रीसनाथिता)। सम्पा. आत्माराम-नारायण-जेरे, नवदेहली: राष्ट्रिय-संस्कृत-संस्थानम्, 2002 (पुनर्मुद्रणम्)।

न्यायपञ्चाननः, विश्वनाथः। *कारिकावली* (प्रत्यक्षखण्डान्ता) (सिद्धान्तमुक्तावली-सूर्य-नारायणशुक्लकृतमयूख-प्रकाशव्याख्योपेता)। सम्पा. रामगोविन्दशुक्लः, वाराणसी: चौखम्बा-संस्कृत-सिरिज्-आफिस, 2008.

न्यायपञ्चाननः, विश्वनाथः। *कारिकावली* (सिद्धान्तमुक्तावलीसहिता)। सम्पा. जीवरामशास्त्री, मुम्बइ: गुजराती-प्रिन्टिंग्-प्रेस्, 1923 (प्रथमप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसिद्धान्तमुक्तावली* (दिनकरी-रामरुद्री-हिन्दीव्याख्या-समेता)। सम्पा. हरिरामशुक्लशास्त्री, वाराणसी: चौखम्बाप्रकाशनम्, 2011(प्रथमप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसिद्धान्तमुक्तावली* (दिनकरी-हिन्दीव्याख्यासमेता)। सम्पा. राजारामशुक्लः, शिमला: इन्डियान्-इन्स्टिटिउट्-अव्-आड्भान्स्ड्-स्टाडिज्, 2015 (प्रथम-प्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसिद्धान्तमुक्तावली* (प्रत्यक्षखण्डात्मिका) (बालप्रिया-व्याख्योपेता)। सम्पा. गजाननशास्त्रि-मुसलगाँवकरः, वाराणसी: चौखम्बा-सुरभारती-प्रकाशनम्, 2014 (प्रथमप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसिद्धान्तमुक्तावली* (मुक्तावलीसंग्रहसहिता)। सम्पा. पञ्चाननशास्त्री, कलिकाता: महाबोधि-बुक्-एजेन्सिः, 2016 (पुनर्मुद्रणम्)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसिद्धान्तमुक्तावली।* सम्पा. श्रीकृष्णवल्लभाचार्यः, वाराणसी: चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2014 (द्वितीयप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *भाषापरिच्छेदः*। सम्पा. अनामिकारायचौधुरी, कलिकाता: संस्कृत-पुस्तक-भाण्डारः, 2004 (प्रथमप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। *भाषापरिच्छेदः*। सम्पा. आशुतोषन्यायाचार्य्यः, कलिकाता: विजयन, 1992.

न्यायपञ्चाननः, विश्वनाथः। *भाषापरिच्छेदः* (ज्वालाप्रसादगौडकृत-विलासिनीसमाख्य-व्याख्यासमेतः)। सम्पा. ढुण्ढीराजशास्त्री, दिल्ली: चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2003.

न्यायपञ्चाननः, विश्वनाथः। *भाषापरिच्छेदः* (मूलानुवाद-विवृतिसहितः)। सम्पा. गुरुनाथ-विद्यानिधिः, विपद्भञ्जनपालप्रकाशितः, कलिकाता: सदेशः, 2009.

न्यायपञ्चाननः, विश्वनाथः। *भाषापरिच्छेदः*। सम्पा. श्रीगोपालचन्द्रमुखोपाध्यायः, मृदुल-कान्तिसेनप्रकाशितः, वर्धमान: वर्धमानविश्वविद्यालयः, 1998, (द्वितीयसंस्करणम्)।

न्यायपञ्चाननः, विश्वनाथः। *न्यायसूत्रवृत्तिः*। सम्पा. सेख-साविर-आलिः, कलिकाता: संस्कृत-पुस्तक-भाण्डारः, 2015 (प्रथमप्रकाशः)।

प्रशस्तपादाचार्यः। *प्रशस्तपादभाष्यम् (पदार्थधर्मसंग्रहः)* (खण्डद्वयात्मकम्)। सम्पा. ब्रह्मचारी मेधाचैतन्यः, कलिकाता: संस्कृत-पुस्तक-भाण्डारः, 2016 (पुनर्मुद्रणम्)।

भट्टाचार्य्यः, गदाधरः। *व्युत्पत्तिवादः* (खण्डद्वयात्मकः)। सम्पा. सच्चिदानन्दमिश्रः, वाराणसी: भारतीय-विद्या-प्रकाशनम्, 2011 (प्रथमसंस्करणम्)।

भट्टाचार्य्यः, गदाधरः। *व्युत्पत्तिवादः* (आदर्शसमेतः) (खण्डद्वयात्मकः)। सम्पा. हरेराम-त्रिपाठी, नवदेहली: राष्ट्रिय-संस्कृत-संस्थानम्, 2011 (प्रथमसंस्करणम्)।

मिश्रः, शङ्करः। *वैशेषिकसूत्रोपस्कारः* (परिष्कार-प्रकाशसमेतः)। सम्पा. सेख-साविर-आलिः, कलिकाता: संस्कृत-वुक्-डिपो, 2013 (प्रथमप्रकाशः)।

Nyayasiddhantapanchanana, Viswanatha, *Bhasha Pariccheda* with *Siddhanta Muktavali*, Ed. Swami Madhavananda, Calcutta: Advaita Ashrama, 1954 (second edition).

## ❖ **इतरसहायककृतिततिः (Secondary source)**


झाल्किकारः, भीमाचार्य्यः। *न्यायकोषः।* बोम्बे**:** गभर्न्मेन्ट्-सेन्ट्राल्-वुक-डिपो, 1893 (द्वितीयसंस्करणम्)।

भट्टाचार्य्यः, श्रीमोहनः तथा भट्टाचार्य्यः, दीनेशचन्द्रः। *भारतीय दर्शन कोष* (प्रथम-खण्डात्मकः)। कलिकाता**:** संस्कृत-कलेज्, 1958.

भट्टाचार्य्यः, दीनेशचन्द्रः। *वङ्गे नव्यन्यायचर्चा।* कलिकाता**:** वङ्गीय-साहित्य-परिषत्, 1358 (वङ्गाब्दः)।

मण्डलः, प्रद्योतकुमारः तथा मण्डलः, केया। *न्यायसम्मत प्रमाणतत्त्वेर रूपरेखा।* कलिकाता**:** प्रगतिशील-प्रकाशकः, 2017 (प्रथमसंस्करणम्)।

मिश्रः, श्रीनारायणः। *न्याय-वैशेषिक दर्शन – एक अध्ययन।* वाराणसी**:** चौखम्बा-संस्कृत-सिरिज-आफिस्, 1968 (प्रथमसंस्करणम्)।

शास्त्री, स्वामिद्वारिकादासः (सम्पा.)। *षड्दर्शनसूत्रसंग्रहः*। वाराणसी**:** सुधीप्रकाशनम्, 1988.

Apte, Vaman Shivram, *The Student's Sanskrit-English Dictionary*, New Delhi**:** Rashtriya Sanskrit Sansthan, 2010.

Bhattacharya, Gopikamohan, *Studies in Nyaya-Vaisesika Theism*, Calcutta: Sanskrit College, 1961.

Chatterjee, Satishchandra & Datta, Dhirendramohan, *An Introduction to Indian philosophy,* Calcutta: University of Calcutta, Seventh Edition, 1968.

Dasgupta, Surendranath, *A History of Indian Philosophy*, Delhi: Motilal Banarasidass, 1975.

Guha, D. C., *Navya Nyaya System of Logic*, Delhi: Motilal Banarasidass, 1979.

Mukhopadhyaya, Govindagopal, *A new Trilingual Dictionary*, Calcutta: Sanskrit Book Depot, 2011.

Potter, Karl H. (Ed.), *Encyclopedia of Indian Philosophy (Vol I-II),* Delhi: Motilal Banarasidass, 1977.

Vidyabhushana, Satishchandra, *A History of Indian Logic*, Delhi: Motilal Banarasidass, 1988.